अर्थवद्ग्रहणान्नेह पटुजातीयाय निर्जरः जराया जरसन्यतरस्यां जराशब्दस्य जरस्वा स्यादजादौ वि
भक्तौ ॥ पदाङ्गाधिकारे तस्य च तदंतस्य च अनेकाल्त्वात्सर्वादेशे प्राप्ते निर्दिश्यमानस्यादेशा भवंति एक २
देशविकृतमनन्यवत्त्वाज्जरशब्दस्य जरस् निर्जरसौ निर्जरसः इनादीन्बाधित्वा परत्वाज्जरस् निर्जरसा नि
र्जरसे निर्जरसः ~~निर्जरसः~~ पक्षे हलादौ च रामवत् इति केचित्तत्तु सर्वविप्रतिषेधेनेनातोः कृतयोः सन्निपात
२ परिभाषाया अनित्यत्वमाश्रित्य जरसि कृते निर्जरस्मिन् निर्जरसादिति रूपं नेतुं निर्जरसा निर्जरस इति
केचिदित्युक्तं तथा भिसि निर्जरसैरिति रूपांतरमुक्तं तदनुसारिभिश्च षष्ठ्येकवचने निर्जरसो नेवरूपमिति
स्वीकृते एतच्च भाष्यविरुद्धं पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु पा
ददंत नासिका मास हृदय निशा असृज् यूषन् दोषन् यकृत् शकृत् उदक आसन् एषां पदादय आदेशाः स्युः शसा
दौ वा पद्दन्नो आसन शब्दस्य सन्नादेशः इति काशिकायामुक्तेर्न्यासमादिकं पादः पादौ पादाः पादं पादौ पदः
पादान् पदा पादेनेत्यादि सुडनपुंसकस्य सुट्प्रत्याहारः स्वादिपंचवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीव
स्य स्वादिष्वसर्वनामस्थाने कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः स्वं पदसंज्ञं स्यात् यचि भम् यकारादि
ष्वजादिषु सर्वनामस्थानेषु परतः स्वं भसंज्ञं स्यात् आकडारादेका संज्ञा इतऊर्ध्वं कडाराः कर्मधारय इत्यतः प्रा
कौ गेकस्यैव संज्ञा ज्ञेया या परानवकाशा च तेन शसादावचि भसंज्ञैव न पदत्वं अतो जश्त्वं न इतः इता जश्त्वे इद्योर
न्यादि मासः मासौ भ्यामि सकृत्वे यत्वे च यलोपः माभ्यां माभिरित्यादि ^ अल्लोपोनः अंगावयवोऽसर्वनाम

मा भस्यअपिकारोपं

अः।

क्वचित्त्वकः स्मृतः इत्यादन्ताः । हरिः प्रथमयोः पूर्वसवर्णः हरी जसि च ह्रस्वान्तस्याङ्गस्य गुणः स्याज्जसि परे हरयः ह्रस्वस्य गुणः ह्रस्व
स्य गुणः स्यात्संबुद्धौ एङ्ह्रस्वादिति संबुद्धिलोपः हे हरे हरिम् हरी हरीन् शेषो घ्यसखि अनदीसंज्ञौ ह्रस्वौ यावि[illegible]वर्णौ तदन्तं स उ
सखिवर्जं घिसंज्ञं स्यात् शेषः किम् मत्यै एकसंज्ञाधिकारात्सिद्धे शेषग्रहणं स्पष्टार्थम् ह्रस्वौ किं वातप्रम्यै यू किं मात्रे आङो नास्त्रि
याम् घेः परस्याङो ना स्यादस्त्रियाम् आङिति टासंज्ञा प्राचाम् हरिणा अस्त्रियां किं मत्या घेर्ङिति घिसंज्ञस्य ङिति सुपि गुणः स्या
त् हरये घेः किं सख्ये ङिति किं हरिभ्याम् सुपि किम् पट्वी घेर्ङितीति गुणे कृते ङसिङसोश्च एङोङसिङसोरति परे पूर्वरूपमेका
देशः स्यात् हरेः हरेः हर्योः हरीणाम् अच्च घेः इदुद्भ्यामुत्तरस्य ङेरौ स्यात् घेरन्तादेशश्चाकारः हरौ हर्योः हरिषु एवं श्रीपत्य
ग्निरविकव्यादयः अनङ् सौ सख्युरङ्गस्यानङ् स्यात् संबुद्धौ सौ परे ङिच्चेत्यन्तादेशः अलोन्त्यात्पूर्व उपधा अन्त्यादलः पूर्वो
वर्ण उपधासंज्ञः स्यात् सर्वनामस्थाने चासंबुद्धौ नान्तस्योपधाया दीर्घः स्यात् संबुद्धौ सर्वनामस्थाने परे अपृक्त एकाल्प्र
त्ययः एकाल्प्रत्ययो यः सोपृक्तसंज्ञः स्यात् हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुति
सीत्येतदपृक्तं हल्लुप्यते हल्ङ्याब्भ्यो किम् ग्रामणीः दीर्घात्किं निष्कौशाम्बिः अतिखट्वः सुतिसीति किम् अभैत्सीत् ति
पा सहचरितस्य ग्रहणान्नेति चोग्रहणं नास्ति अपृक्तस्य किं बिभर्त्ति हल् किम् बिभेद प्रथम हल् किं राजा न लोपो नस्यो
संयोगान्तलोपस्यासिद्धत्वात् सखा हे सखे सख्युरसंबुद्धौ सख्युरङ्गात्परं संबुद्धिवर्जं सर्वनामस्थानं णिद्वत् अचो ञ्णि
जंतां ति ञिति णिति च प्रत्यये परे अजन्ताङ्गस्य वृद्धिः स्यात् सखायौ सखायः सखायम् सखायौ सखीन् घिसंज्ञाभावान्न तत्का
र्यं सख्या सख्ये ख्यत्यात्परस्य खितिशीतिभ्यां खीतीशीभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उत्स्यात् सख्युः ॥
औत् इदुद्भ्यां परस्य ङेरौत्स्यात् उकारानुबन्धनिरुत्तरार्थः सख्यौ शेषं हरिवत् शोभनः सखा सुसखा सुसखायौ सुसखायः

नपूजनादिति समासान्तसामान्यनिषेधान्नेटच्।

सि· कौ
१२

अत्र हि द्वावयो गंगत्वात्तदंतेपि प्रवृत्तिः सुसख्यादायस्य सखिरूपत्वाभावे नासखीति निषेधाप्रवृत्तेर्घिसंज्ञा सुसखिना सु
सखये ङसिङसोर्गुणे कृते कृतयणादेशत्वाभावात् ख्यत्यादित्युत्वं न सुसखेः २ सुसखौ इत्यादि एवमतिशयितः सखा
अतिसखा परमः सखा यस्येति विग्रहे परमसखा परमसखायावित्यादि गौणत्वेप्यनङ्णित्वे प्रवृत्तेः सखीमतिक्रांतो ति
सखिः लिंगविशिष्टपरिभाषाया अनित्यत्वान्न टच् हरिवत् इहानङ्णित्वे न भवतः गोस्त्रियोरिति ह्रस्वेन सखिशब्दस्य
लाक्षणिकत्वात् लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणात् पतिः समास एव पतिशब्दः समास एव घिसंज्ञः स्यात्
पत्या पत्ये पत्युः पत्यो शेषं हरिवत् समासे तु भूपतये कतिशब्दो नित्यं बहुवचनांतः बहुगणवतुडति संख्या एते संख्याः
संज्ञाः स्युः डति च डत्यंता संख्या षट्संज्ञा स्यात् प्रत्ययस्य लुक्श्लुलुपः लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्सं
ज्ञं स्यात् षड्भ्यो लुक् षड्भ्यः परयोर्जश्शसोर्लुक् स्यात् प्रत्ययलोपे प्रत्ययलक्षणं प्रत्यये लुप्तेपि तदाश्रितं कार्यं
स्यात् इति जसि चेति गुणे प्राप्ते न लुमतांगस्य लुक्श्लुलुप्शब्दैः लुमंतः लुमता शब्देन लुप्ते तन्निमित्तमंगकार्यं न स्यात् कतिः
कतिभिः कतिभ्यः २ कतीनाम् कतिषु अस्मद्युष्मद्षट्संज्ञास्त्रिषु सरूपाः त्रिशब्दो बहुवचनांतः त्रयः त्रीन् त्रिभिः त्रि निसे ६
भ्यः २ त्रेस्त्रयः त्रिशब्दस्य त्रयादेशः स्यादामि त्रयाणां परमत्रयाणाम् गौणत्वे नेति केचित् प्रियत्रीणाम् वस्तुतस्तु प्रि तु ५
निसे ४ यत्रयाणां त्रिषु द्विशब्दो द्विवचनांतः त्यदादीनामः एषामकारोंतादेशः स्याद्विभक्तौ द्विपर्यंतानामेवेष्टिः द्वौ द्वाभ्याम् राम
व ३ २ द्वयोः २ द्विपर्यंतानां किम् भवान् भवंतौ संज्ञायामुपसर्जनत्वे नात्वम् सर्वाद्यंतर्गणकार्यत्वात् द्विर्नाम कश्चित् द्विः १२
द्वौ द्वयः द्वावतिक्रांतो निर्द्विः हरिवत् प्राधान्ये तु परमद्वौ इत्यादि औडुलोमिः औडुलोमी उडुलोमाः लोम्नोऽपत्येषु बहु
ष्वकारो वक्तव्यः बाह्वादीञोपवादः औडुलोमिम् औडुलोमी उडुलोमान् इतीदंताः वातप्रमीरित्युणादिसूत्रेण मा

सव १

ङ्‌ ईप्रत्ययः किंतु वातंप्रमिं नीति इति वातप्रमीः दीर्घाज्जसि च वातप्रम्यौ वातप्रम्यः हे वातप्रमीः अमिपूर्वः वातप्रमीं वात
प्रम्यौ वातप्रमीन् वातप्रम्या वातप्रम्ये वातप्रम्यः २ वातप्रम्योः वातप्रम्यां दीर्घत्वान्ननुट् ङौतु सवर्णदीर्घः वातप्रमी वं
तप्रम्योः वातप्रमीषु एवं ययीपप्यादयः यान्त्यनेनेति ययीः मार्गः पाति लोकमिति पपीः सूर्यः ययीः पपीः कित्‌ हे चेति
ईप्रत्ययः क्विवंत वातप्रमी शब्दस्यतु अमिशसि ङे च विशेषः वातप्रम्यं वातप्रम्यः स्त्र्याख्यौ नदी ईदूदंतौ नित्यस्त्रीलिङ्गौ नदीसं
ज्ञौ स्तः प्रथमलिंगग्रहणं च पूर्वं स्त्र्याख्यस्योपसर्जनत्वेपि नदीत्वं वक्तव्यमित्यर्थः अंबार्थनद्योर्ह्रस्वः अंबार्थानां नद्यंतानां च ह्रस्वः स्या
त्संबुद्धौ हे वहुश्रेयसि शसि वहुश्रेयसीन् आण्नद्याः नद्यंतात्परेषां ङितामाडागमः स्यात् आटश्च आटोचिपरे वृद्धिरेकादेशः स्या
त् वहुश्रेयस्यै वहुश्रेयस्याः २ नद्यंतात्परत्वान्नुट् वहुश्रेयसीनाम् ङेराम्नद्याम्नीभ्यः नद्यंतादावंतान्नीशब्दाच्च ङेः आम् स्यात्॥
इह परत्वादाटा नुड् बाध्यते वहुश्रेयस्याम् शेषं प्रमीप्रत्ययांत वातप्रमीवत् अङ्यंतत्वान्न सुलोपः अतिलक्ष्मीः शेषं वहुश्रेयसीव
त् कुमारीमिच्छन् कुमारीवाचरन् वा ब्राह्मणः कुमारी क्यजंतादाचारक्विवंताद्वा कर्त्तरि क्विप् हल्ङ्यादिलोपः अचिश्नुधातु
भ्रुवांय्वोरियङुवङौ श्नुप्रत्ययांतस्येवर्णोवर्णांतस्य धातोर्भ्रू इत्येतस्य चांगस्य इयङ्‌उवङौ स्तः जादेः प्रत्यये परे ङिच्चेत्यंतादेशः
आंतरतम्यादिरियङ् उरुवङ् इति इयङि प्राप्ते एरनेकाचोसंयोगपूर्वस्य धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदंतो यो धा
तुस्तदंतस्यानेकाचोंगस्य यण् स्यादजादौ प्रत्यये परे इति यण् कुमार्यौ कुमार्यः हे कुमारि अमि शसि च कुमारीम् कुमार्यः
कुमार्यै कुमार्याः २ कुमारिणाम् कुमार्याम् प्रधीः प्रध्यौ प्रध्यः उन्नयतीत्युन्नीः धातुनासंयोगस्य विशेषणाद्विहस्यादेवय
णः उन्न्यौ उन्न्यः हे उन्नीः उन्न्यम् ङेराम् उन्न्याम् एवं ग्रामणीः अनेकाचः किम् नीः नियौ नियः अमि शसि च परत्वादियङ् नि
यम् नियः ङेराम् नियाम् असंयोगपूर्वस्य किम् सुश्रियौ यवक्रियौ गतिकारकेतरपूर्वपदस्य यण्नेष्यते शुद्धधियौ

ङौतु ग्रामण्यां ॥ २ रि ४

वातप्रमि एरनेकाच इति वक्ष्यमाणो यण् प्रधीवत् वहु[illegible]
श्रेयसी यस्य सः वहुश्रेयसी दीर्घङ्यंतत्वाद्धल्ङ्यादिलोपः ४

सि॰ कौ॰
१४

परमधियौ कथं तर्हि दुर्धियः वृश्चिकभियः इत्यादि उच्यते दुःस्थिता धीर्येषामिति विग्रहे दुष्शब्दस्य धीशब्दं प्रति गतित्वमेव ति
नास्ति यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञाः वृश्चिकशब्दस्य बुद्धिकृतमुपादानत्वं नेह विवक्षितम् वृश्चि
कसंबंधिनी भीर्येषां वृश्चिकभीरित्युत्तरपदलोपो वा ॥ न भूसुधियोः ॥ एतयोर्यण् न स्यादचि सुपि सुधियौ सुधियः सखायमिच्छ
तीति सखीयति ततः क्विप् अल्लोपयलोपौ अल्लोपस्य स्थानिवत्त्वाद्यणि प्राप्ते क्वौ लुप्तं न स्थानिवत् एकदेशविकृतस्या
नन्यत्वात् अनङ् सौ इति सखा सखायौ सखायः हे सखीः अमि पूर्वरूपात् परत्वाद्यणि प्राप्ते तन्नापि परत्वात् सख्युरसंबुद्धौ वि
इति णित्ववर्त्तेते सखायम् सखायौ शसि यण् सख्यः सह खेन वर्त्तते इति सखः तमिच्छतीति सखीः सुखमिच्छतीति सुखीः सुतीः सुख्यौ ति॰ सखायौ। सिद्धत्वादि
सुत्यौ ख्यत्यादिति दीर्घस्यापि ग्रहणादुकारः सख्युः सुख्युः सुत्युः लूनमिच्छति लूनीः क्षाममिच्छति क्षामीः प्रस्तीमिच्छति प्रस्तीमीः एवं
ङसिङसोर्यण् न त्वमत्वयोरसिद्धत्वात् ख्यत्यादित्युत्वम् लून्युः क्षाम्युः प्रस्तीम्युः शुष्कीयतेः शुष्कीः पक्वीः इयङ् अ क्विप्
ष्कियौ शुष्कियः ङसिङसोः शुष्कियः इतीदंताः शंभुर्हरिवत् एवं विष्णुवायुभान्वादयः तृज्वत्क्रोष्टुः क्रोष्टुस्तृजंतेन
तुल्यं वर्त्तते असंबुद्धौ सर्वनामस्थाने परे क्रोष्टुशब्दस्थाने क्रोष्टृशब्दः प्रयोक्तव्य इत्यर्थः ऋतो ङिसर्वनामस्थानयोः ङौ सर्वनामस्था वु
ने च परे ऋदंतांगस्य गुणः स्यादिति प्राप्ते ऋदुशनस्पुरुदंसोनेहसां च ऋदंतानामुशनसादीनां चानङ् स्यादसंबुद्धौ सौ परे अप्
तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् अबादीनामुपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे नप्त्रादि
ग्रहणं व्युत्पत्तिपक्षे नियमार्थं तेन पितृभ्रातृप्रभृतीनां न अव्युत्पत्तिपक्षे विध्यर्थं उद्गातृशब्दस्य भवत्येव समर्थसूत्रे उद्गातार इति राम
भाष्यप्रयोगात् क्रोष्टा क्रोष्टारौ क्रोष्टारः क्रोष्टारं क्रोष्टारौ क्रोष्टून् विभाषा तृतीयादिष्वचि अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्व १४
त् क्रोष्ट्रा क्रोष्ट्रे ऋत उत् ऋदंतात् ङसिङसोरति परे उकार एकादेशः स्यात् रपरत्वम् रात्सस्य रेफात् संयोगांतस्य सस्यैव लोपो ना

१ उणादिनिष्पन्नानां तृन्तृजंतानां चेद्भवति तर्हि नप्त्रादीनामेव।

१ स्येवेति किं। ऊर्क्‌। १

न्यस्वरे फस्य विसर्गः। क्रोष्टुः २ आमि परत्वान्नुज्वद्भावे प्राप्ते नुमचिरत्‌ ज्वद्भावेभ्यो नुट्‌पूर्वविप्रतिषेधेन क्रोष्टूनाम्‌। क्रोष्ट
रि क्रोष्टरि। पक्षे हलादौ च शंभुवत्‌। इत्युदंताः। हूहूः। हूहौ। हूहूः। हूहूं। हूहौ। हूहून्‌। अतिचमूशब्दे तु नदीकार्यं विशेषः। हे अ
तिचमु। अतिचम्वै। अतिचम्वाः २ अतिचमूनाम्‌। अतिचम्वाम्‌। खलपूः। ओः सुपि। धात्ववयवसंयोगपूर्वो न भवति य
उवर्णस्तदंतो यो धातुस्तदंतस्यानेकाचोंगस्य यण्‌ स्यादजादौ सुपि॥ गतिकारकेतरपूर्वपदस्य यण्‌ नेष्यते॥ खलप्वौ
खलप्वः। एवं सुल्वादयः। अनेकाचः किम्‌। लूः। लुवौ। लुवः। धात्ववयवेति किम्‌। उल्कूः। उल्क्वौ। असंयोगपूर्वस्य किं
म्‌। कटप्रुवौ। कटप्रुवः। गतिकारकेति किं। परमलुवौ। सुपि किम्‌। लुलुवतुः। स्वभूः। न भूसुधियोः। स्वभुवौ। स्वभुवः। वर्षा
भ्वश्च॥ अस्योवर्णस्य यण्‌ स्यादचि सुपि। वर्षाभ्वौ। वर्षाभ्वः। दृंभतीति दृंभूः। अदूदृंभूजम्बूकफेलूकर्कंधूदिधिषूः॥
इत्युणादिसूत्रेण व्युत्पादितः। दृंभ्वौ। दृंभ्वः। दृंभ्वम्‌। दृंभ्वौ। दृंभून्‌। दृनिति नांते हिंसार्थेऽव्यये भुवः क्विप्‌ दृन्भूः। दृन्कर
पुनः पूर्वस्य भुवो यण्‌ वक्तव्यः। दृन्भ्वौ। दृन्भ्वः। खलपूवत्‌। करभ्वम्‌। करभ्वः। दीर्घपाठे कर एवकारः। स्वार्थिकः। अग्रा
ह्यणकारभ्वौ। कारभ्वः। पुनर्भूर्यौगिकः पुंसि। पुनर्भ्वौ इत्यादि। दृग्भूकाराभूशब्दौ स्वभूवत्‌॥ इत्यूदंताः॥ धाता। हे धा
तः। धातारौ। धातारः। ऋवर्णान्नस्य णत्वं वाच्यम्‌। धातॄणाम्‌। एवं नप्त्रादयः। उद्गातारौ। पिता व्युत्पत्तिपक्षे नप्त्रादिग्रहणस्य
नियमार्थत्वान्न दीर्घः। पितरौ। पितरः। पितरम्‌। पितरौ। शेषं धातृवत्‌। एवं जामातृभ्रात्रादयः। ना। नरौ। नरः। हे नः। नृ च। न
इत्यस्य नामि वा दीर्घः स्यात्‌॥ नृणाम्‌। नॄणाम्‌॥ इत्यृदंताः॥ कृत्‌ कॢ अनयोरनुकरणे प्रकृतिवदनुकरणमिति वैकल्पिका
तिदेशात्‌। द्वित्वे रपरत्वम्‌॥ कीः। किरौ। किरः। तीः। तिरौ। तिरः। इत्यादि गीर्वत्‌। इत्वाभावपक्षे ऋदुशनेति अनंतोऽङीति च
तपरकरणात्‌ अनङ्‌ गुणे। नक्रः। क्रौ। क्रः। क्रम्‌। क्रौ। क्रन्‌। इत्यादि। इत्यृदंताः। गम्लृ शक्लृ अनयोरनुकरणे अनङ्‌ गमा शका

गुणविषयेतु लपरत्वम्। गमलौ। गमलः। गमलून्। गमला। गमलो। ङसिङसोस्तु ऋत उदित्युत्वे लयरत्वे संयोगांतलोपः

सि॰कौ॰१५ गमुल्। शकुल्। इत्यादि इति ल्रृदंताः॥ सेः सयौ सयः। स्मृतेः स्मृतयो स्मृतयः॥ इत्यैदंताः॥ गोतोणित्। गोशब्दात्प

रं सर्वनामस्थानं णित्कार्यं कृतस्यात्॥ गौः गावौ गावः॥ औतोम्शसोः॥ आ ओत इति छेदः। ओकारादम्शसोरचि परे आ

ने॰ कारएकादेशः स्यात्। शसासाहचर्यात्सुबेवाम् गृह्यते नेह अचिनवम्। गाम् गावौ गाः गवा गवे गोः इत्यादि ओतोणि

दितिवाच्यम्। विहितविशेषणं चेतेन सुद्योः सुद्यावौ सुद्यावः॥ ओकारांद्विहितं सर्वनामस्थानमिति व्याख्यानान्नेह हे भानो ता॰

सः भानवः उः शंभुः स्मृतोयेनसस्मृतोः स्मृतावौ स्मृतावः स्मृताम् स्मृतावौ स्मृताः॥ इत्योदंताः॥ [redacted]

रायोहलि। रैशब्दस्याकारोंतादेशः स्याद्धलि विभक्तौ। अविभ्रायाद्देशः॥ राः रायौ रायः रायम् रायौ रायः राया राभ्याम् इ

त्यैदंताः ग्लौः ग्लावौ ग्लावः ग्लावं ग्लावौ ग्लावः औतोम्शसोरिति हलनवर्तते ऐचोचूत्स्येण ओदौतोः सावर्ण्याभावत्वापनात्

इत्यौदंताः इत्यजंताः पुंल्लिंगाः रमा औङ आपः आबंतादंगात्परस्यौङः शीस्यात् औङि त्यौकारकॊरविभक्तेः संज्ञा रमे रमाः सं

बुद्धौ च आपएकारः स्यात् संबुद्धौ एङ्ह्रस्वात्संबुद्धेरिति संबुद्धिलोपः हे रमे २ हे रमाः रमाम् रमे स्त्रीत्वात्नत्वाभावः रमाः आङि चापः

रः आङि ओसि च परे आबंतस्यांगस्यैकारः स्यात् रमया रमाभ्याम् रमाभिः याडापः आपः परस्य ङिद्वचनस्य याडागमः स्यात् वृद्धिरे

चि रमायै सवर्णेदीर्घः रमायाः २ रमयोः रमाणाम् रमायाम् रमयोः रमासु एवं दुर्गादयः॥ सर्वनाम्नः स्याड्ढ्रस्वश्च आबंता

त्सर्वनाम्नः परस्य ङितः स्याट् स्यादापश्च ह्रस्वः याडोपवादः सर्वस्यै सर्वस्याः एकादेशस्य पूर्वांतत्वेन ग्रहणाद्वा भिसर्वनाम्नः

इति स्वट् सर्वस्यां सर्वस्याम् सर्वयोः सर्वासु एवं विश्वादयः आबंताः विभाषादिक्समासे बहुव्रीहौ अत्र सर्वनामता वा स्यात् राम

उत्तरपूर्वायै उत्तरपूर्वास्यै दिङ्नामान्यंतराले इति प्रतिपदोक्तस्य दिक्समासस्य ग्रहणान्नेह योत्तरा सा पूर्वा यस्या उन्मुग्धा १५

आभ्यांपरस्य २

घास्तस्ये उत्तरपूर्वायै बहुव्रीहिग्रहणंस्पष्टार्थम् अंतरस्यैशालायै वाह्यायैइत्यर्थः अपुरीत्युक्तेर्नेह अंतरायैनगर्यै वि

भाषाद्वितीयातृतीयाभ्याम् ङितःस्याट्स्यादापश्चह्रस्वः इदंस्फटंतमुक्तंप्राक्यम् शेषंपरमावत् एवंतृतीयाः अंवार्थेनद्योर्ह्र

स्वः॥ हेअंब हेअक्क हेअल्ल असंयुक्तायेडलकास्तद्वतांह्रस्वोनः हेअंबाडे हेअंबाले हेअंबिके जराजरसोशीभावात्

रत्वाज्जरस् आमिनुटः परत्वाज्जरस् जरसामित्यादिपक्षेरमावत् इहपूर्वंविप्रतिषेधेनशीभावंकृत्वासन्नियातपरिभाष

या अनित्यतांचाश्रित्यजरसीतिकेचिदाहुस्तन्निर्मूलम् यद्यपिजरसादेशस्यस्यानिवद्भावेनावंततामाश्रित्य ङेङआ

पः आडिचापः याडापः ह्रस्वनद्यापः ङेराम् इतिपंचापिविधयः प्राप्ताः एवंनमित्तिशष्टस्तथाप्यनल्विधाविन्युक्तेर्नेभ

वंति अआबितिपक्षेपिअकाररूपस्यैवापः सर्वत्रग्रहणात् एवंहलङ्याबितिसूत्रेपि आआपङीईईतिपक्षेस्याद

तिरवङः तिष्कोशांबिरित्यादिसिद्धेदीर्घग्रहणंप्रत्याख्येयं नचैवमप्यातिरवङ्यायेतत्रत्वाप्रयमकारत्वेस्यानिवद्भा

वेनात्वंचाश्रित्ययाट्स्यादितिवाच्यम् आबंतंयदंगंततःपरस्यपाद्विधानात् उपसर्जनस्त्रीप्रत्ययेतदादिनियमात् पद्दन्

इतिनासिकायानसन्नसः तसांनोभ्यामित्यादिपक्षेसुटिचरमावत् निशायानिष्टतिप्रः निशा वश्चभ्रस्जसृजमृज

यजराजभ्राजछशांषः वश्चादीनांसप्तानांछशांतयोश्चषकारोंतादेशः स्यात् झलिपदांतेच सस्यजश्त्वेनडः तिड्भ्या

म् तिड्भिः सुपिडःसीतिपक्षेधुट्चर्त्वेम् तस्यासिद्धत्वाच्चयोद्वितीयाइतिटतयोष्ठथौनतपदांताट्टोरितिनष्टुत्वंनिट्

सुनिट्त्सु षढोःकःसि षस्यढस्यचकःस्यात् सकारेपरेइतितुनभवतिजश्त्वंषत्वसिद्धत्वात् केचित्तुवश्चादिसूत्रेवेदा

देर्धात्वोरितिसूत्राद्धातोरित्युनुवर्त्तयंतितन्मतेजश्त्वेनजकारेनिज्भ्यां निज्भिः श्चुत्वेनिच्षुश्चोःकुरितिकुत्वंतुनभव

ति जश्त्वस्यासिद्धत्वात् मांसपृतनासानूनांमांसपृत्सनवोवाच्याः शशादेर्वा पृतः पृता पृद्भ्यां पक्षेसुटिरमावत्गो

२

लिंगविशिष्टपरिभाषयातिसख्यङिःस्यस्यां नाम् द्वि
यस्य द्वितीयायां द्वितीयस्याः २ द्वितीयस्याम्
द्वितीयायाम् ॥ २ ॥

पाविश्वपावत् मतिः प्रायेण हरिवत् स्त्रीत्वान्नत्वाभावः मतीः नात्वं न मत्या ङिति ह्रस्वश्च इयङुवङ्स्थानौ स्त्रीशब्दभि
न्नौ नित्यस्त्रीलिंगावीदूतौ ह्रस्वौ च इवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे आण्नद्याः मत्यै मतये मत्याः मतेः नदी
त्वपक्षे औदिति ढेरौत्वे प्राप्ते इदुद्भ्यां नदीसंज्ञिकाभ्यामिदुद्भ्यां परस्य ङेराम् स्यात् पक्षे अच्च घेः मत्यां मतौ एवं श्रुतिस्मृ
त्यादयः ॥ त्रिचतुरोः स्त्रियां तिसृचतसृ एतयोः स्त्रीलिंगयोरेतावादेशौ स्तो विभक्तौ परतः अचि र ऋतः तिसृचतसृ ए
तयोर्ऋकारस्य रेफादेशः स्यादचि गुणदीर्घोत्वानामपवादः तिस्रः २ तिसृभिः तिसृभ्यः आमि नुम् अचिरेति नुट् न
तिसृचतसृ एतयोर्नामि दीर्घो न स्यात् तिसृणां तिसृषु स्त्रियामिति त्रिचतुरोर्विशेषणान्नेह प्रियास्त्रयः स्त्रीणि वा यस्याः
सा प्रियत्रिः मतिवत् आमि प्रियत्रयाणामिति विशेषः प्रियास्तिस्रो यस्य स इति विग्रहे तु प्रियतिसा प्रियतिस्रौ प्रियतिस्रः
प्रियतिस्रमित्यादि प्रियास्तिस्रो यस्य तत्कुलं प्रियत्रि स्वमोर्लुका लुप्तत्वे न प्रत्ययलक्षणमावान्न तिस्रादेशः न लुमते 
॰ श्री ति निषेधस्यानित्यत्वात्पक्षे प्रियतिसृ शब्दादेशात्पूर्वं विप्रतिषेधेन नुम् प्रियतिसृणी प्रियतिसृणि तृतीयादिषु वक्ष्यमाणविक
ल्पात्पर्यायेण नुमृ रभावौ प्रियतिस्रा प्रियतिसृणा द्वेरत्वे सत्याप् द्वे २ द्वाभ्यां २ द्वयोः २ गौरी गौर्य्यौ गौर्य्यः नदीकार्यं हे गौरि गौ
र्य्यै एवं वाणी नद्यादयः प्रातिपदिकग्रहणे लिंगविशिष्टग्रहणाद् न ङि णिङ्गावे च प्राप्ते विभक्तौ लिंगविशिष्टस्याग्रहणं सखी सख्यौ
सख्यः इत्यादि गौरीवत् अङ्यंतत्वान्न सुलोपः लक्ष्मीः शेषं गौरीवत् एवं तरीतंत्र्यादयः स्त्री हे स्त्रि स्त्रियाः स्त्रीशब्दस्येयङ् स्याद्
स्त्रियो॰ जादौ प्रत्यये परे स्त्रियः वाम्शसोः अमि शसि च स्त्रिया इयङ् वा स्यात् स्त्रियं स्त्रीं स्त्रियौ स्त्रियः स्त्रीः स्त्रिया स्त्रियै स्त्रियाः २ स्त्रियोः ।
परत्वान्नुट् स्त्रीणां स्त्रियां स्त्रियोः स्त्रीषु स्त्रियमतिक्रांतो तिस्त्रिः अतिस्त्रियौ गुणनाभावोत्वनुङ्ङिः परत्वात्पुंसि वाध्यते लीवे नुमाच
स्त्रीशब्दस्येयङ्ङित्यंवधार्यताम् १ जसि च अतिस्त्रयः हे अतिस्त्रे वाम्शसोः अतिस्त्रियं अतिस्त्रिं अतिस्त्रियौ अतिस्त्रियः अतिस्त्रीन्

अतिस्त्रिणा घेर्ङिति अतिस्त्रये अतिस्त्रेः २ अतिस्त्रीणां अच्च घेः अतिस्त्रौ ओस्यौकारे च नित्यं स्यादम्शसोस्तु विभाषया इ
यादेशोऽचि नान्यत्र स्त्रियाः पुंस्युपसर्जने १ क्लीबे तु नुम् अतिस्त्रि अतिस्त्रिणी अतिस्त्रीणि अतिस्त्रि पुण्डे·५४ तावजादेव
स्यमाणपुंवद्भावात्पक्षे षागवद्रूपं अतिस्त्रये अतिस्त्रिणः अतिस्त्रेः अतिस्त्रिणः अतिस्त्रियोः इत्यादि स्त्रियां तु प्रायेण पुंव
त् शास्ति अतिस्त्रीः अतिस्त्रिया ङिति ह्रस्वश्चेति ह्रस्वांतत्वप्रयुक्तो विकल्पः अस्त्रीति तु इयङुवङ्स्थानावित्यस्यैव पर्युदासः
नत्वंवद्रूपस्यैवानुवृत्तेः दीर्घस्यायं निषेधो न तु ह्रस्वस्य अतिस्त्रियै अतिस्त्रये अतिस्त्रियाः २ अतिस्त्रेः २ अतिस्त्रियां अतिस्त्रौ श्रीः
श्रियौ श्रियः नेयङुवङ्स्थानावस्त्री इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्तो न तु स्त्री। हे श्रीः श्रियै श्रिये श्रियाः
श्रियः २ वामि। इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तो न तु स्त्री श्रीणां श्रियां श्रियि श्रियां प्रधीप्रकृत्यस्तु वृ
त्तिकारादीनां मते लक्ष्मीवद्रूपं पदांतरं विनापि स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वमिति स्वीकारात् लिंगांतरानभिधायकत्वं तदि
ति कैयटमते तु पुंवद्रूपं प्रकृष्टा धीरिति विग्रहे तु लक्ष्मीवत् अमि शसि च प्रध्यं प्रध्यः इति विशेषः सुष्ठु धीर्यस्याः सुष्ठु ध्या
यति वेति विग्रहे हरिमते सुधीः श्रीवत् मतांतरे तु पुंवत् सुष्ठु धीरिति विग्रहे तु श्रीवदेव ग्रामणीः पुंवत् ग्रामनयं स्योत्सर्गतः
पुंधर्मे तया पदांतरं विना स्त्रियामप्रवृत्तेः एवं खलपवनादेरपि पुंधर्मत्वमौत्सर्गिकं बोध्यं धेनुमतिवत् स्त्रियां च स्त्रीवाची क्रो
ष्टुशब्दस्तृजंतवद्रूपं लभ्यते ऋन्नेभ्यो ङीप् ऋदंतेभ्यो नंतेभ्यश्च स्त्रियां ङीप् स्यात् क्रोष्ट्री क्रोष्ट्र्यौ क्रोष्ट्र्यः वधूर्गौरीवत्
भ्रूः श्रीवत् हे सुभ्रूः कथं तर्हि हा पितः क्वासि हे सुभ्रु इति भट्टिः प्रमाद एवायमिति वद्रुवः खलपूः पुंवत् पुनर्भूः दृन्क
रेति यण् उवङोऽपवादः धनात् नेयङुवङिति निषेधो न हे पुनर्भु पुनर्भ्वं पुनर्भ्वौ पुनर्भ्वः एकाजुत्तरपदे णः एकाजुत्तरपदं यस्य
तस्मिन्समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकांतनुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्यात् आरंभसामर्थ्यान्नित्यत्वे सि

स्थाना
असर्वनामार्थ प्रयमारंभः

सि· कौ
१७

हेपुनर्भूग्रहणं स्पष्टार्थं यणं बाधित्वा परत्वान्नुट् पुनर्भ्वाणां वर्षाभ्वः भेकजातौ नित्यस्त्रीत्वाभावात् हे वर्षाभूः कैयट
मते मतांतरे तु हे वर्षाभु पुनर्नवायां तु हे वर्षाभु भेकां पुनर्नवायां स्त्री वर्षाभूर्दर्दुरे पुमानिति यादवः वर्षाभ्वश्च वर्षाभ्वौ
वर्षाभ्वः स्वयंभूः पुंवत् न षट्स्वस्रादिभ्यः षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च ङीप्टापौ न स्तः स्वसा तिस्रश्चतस्रश्च ननां
हृ दा दुहिता तथा याता माता इति सप्तैते स्वस्रादय उदाहृताः १ अप्तृन्निति दीर्घः स्वसा स्वसारौ स्वसारः मातापितृवत् शस्ति
मातॄः द्यौर्गौवत् राः पुंवत् नौर्ग्लौवत् इत्यजंताः स्त्रीलिंगाः अतोम् अतोंगान्नपुंसकलिंगात्परयोः स्वमोरम् स्या
हृ६ त् अमि पूर्वः ज्ञानं एङ्ह्रस्वादिति हल्मात्रलोपः हे ज्ञान नपुंसकाच्च क्लीबात्परस्यौङः शी स्यात् भसंज्ञायां यस्येति च
भस्येवर्णावर्णयोर्लोपः स्यात् ईकारे तद्धिते च परे इत्यकारलोपे प्राप्ते औङः श्यां प्रतिषेधो वाच्यः ज्ञाने जश्शसोः शिः
क्लीबादनयोः शिः स्यात् शि सर्वनामस्थानं शि इत्येतदुक्तसंज्ञं स्यात् नपुंसकस्य झलचः झलंतस्याजंतस्य च क्लीबस्य
नुमागमः स्यात् सर्वनामस्थाने परे उपधायादीर्घः ज्ञानानि पुनस्तद्वत् शेषं पुंवत् एवं धनवनादयः अद्ड्डतरादिभ्यः पं
चभ्यः एभ्यः क्लीबेभ्यः स्वमोरद्डादेशः स्यात् टेः डिति परे भस्य टेर्लोपः वावसाने कतरत् कतरद् कतरे कतराणि
भस्येति किं पंचमः टेर्लुप्तत्वात् प्रथमयोरिति पूर्वसवर्णदीर्घः एङ्ह्रस्वादिति संबुद्धिलोपश्च न भवति हे कतरत् पुनस्तद्व
अन्यत्। अन्यतम् तु। त् शेषं पुंवत् कतमत् इतरत् अन्यतमस्य तु अन्यतममित्येव एकतरात्सर्वत्र प्रतिषेधो वक्तव्यः एकतरं सौरमादेशे सन्निपातपरि हृते ४
भाषया न जरस् अजरं अजरसी अजरे परत्वाज्जरसि कृते झलंतत्वान्नुम् सांतमहतः संयोगस्य सांतसंयोगस्य महतश्च
या तश्च यो नकारस्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे अजरांसि अमि लुकोपवादम्भावं बाधित्वा परत्वा राम १७
ज्जरस् ततः सन्निपातपरिभाषया न लुक् अजरसं अजरं अजरसी अजरे अजरांसि अजराणि शेषं पुंवत् पद्दन्

उपधाग्रहणं पूर्वमात्रोपलक्षणं पारिभाषिकार्थस्येहासंभवात्।२ ति४

माँद्भिरित्यत्र मांसादेशस्य नकारविधायके मांसपृतनेति मांसादेशः

नि हृदयोदकास्यानां हृद् उदन् आसन् हृंदि हृदा हृद्भ्यां उदानि उद्ना उदभ्यां आसानि आस्ना आसभ्यां मांसि मांसा मान्
भ्यां वस्तुतस्तु प्रभृतिग्रहणं प्रकारार्थमित्युक्तं अत एव भाष्ये मांस्यचन्या उखाया इत्युदाहृतं अयस्मयादित्वेन भत्वात्संयोगां
तलोपेन यद्यपि पद्दन्नित्यत्र हृदि छंदसीत्यनुवर्तितं तथापि तथाप्ययोभीत्यत्र मांसप्छंदसीति वार्तिके छंदोग्रहणसामर्थ्या
ल्लोके पि क्वचिदिति कैयटोक्तरीत्या प्रयोगमनुसृत्य पदादयः प्रयोक्तव्या इति बोध्यं ह्रस्वो नपुंसके प्रातिपदिकस्य क्लीबे प्रातिपदिक
स्याजंतस्य ह्रस्वः स्यात् श्रीपं ज्ञानं श्रीपाय अत्र सन्निपातपरिभाषया आतो धातोरित्याल्लोपो न स्वमोर्नपुंसकात् क्लीबात्स्व
मोर्लुक् स्यात् वारि इकोऽचि विभक्तौ इगंतस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ वारिणी वारीणि न लुमतेति निषेधस्यानि रंगा
त्यत्वात्पक्षे संबुद्धिनिमित्तो गुणः हे वारे हे वारि आङो ना वारिणा घेर्ङितीति गुणे प्राप्ते वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्व
विप्रतिषेधेन वारिणे वारिणः वारिणोः नुमचिरेति नुट् नामीति दीर्घत्वं वारीणां वारिणि वारिणोः हलादौ हरिवत् तृती
यादिषु भाषितपुंस्कं पुंवद्गालवस्य प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगंतं क्लीबं पुंवद्वा स्यात् टादावचि अनादिने अनादये इ
त्यादि प्रोषं वारिवत् पीलुर्वृक्षस्तत्फलं पीलु तस्मै पीलुने अत्र न पुंवत् प्रवृत्तिनिमित्तभेदात् अस्थिदधिसक्थ्यक्ष्णा
मनङुदात्तः एषामनङ् स्याट्टादावचि स चोदात्तः अल्लोपोनः दध्ना दध्ने दध्नः २ दध्नोः दध्नि दधनि शेषं वारिवत् एवम
स्थिसक्थ्यक्षि तदंतस्याप्यनङ् अतिदध्ना सुधि सुधिनी सुधीनि हे सुधे हे सुधि सुधिया सुधिना प्रध्या प्रधिना मधु
मधुनी मधूनि हे मधो हे मधु एवं मद्वादयः सानुप्रो ह्रस्वस्तुवी स्नूनि सानूनि प्रियक्रोष्टु प्रियक्रोष्टुनी तृज्वद्भावात्पूर्ववि
प्रतिषेधेन नुम् प्रियक्रोष्टूनि टादौ पुंवत् पक्षे प्रियक्रोष्ट्रा प्रियक्रोष्टुना प्रियक्रोष्ट्रे प्रियक्रोष्टवे अन्यत्र तृज्वद्भावात्पूर्ववि
प्रतिषेधेन नुमेव प्रियक्रोष्टुना प्रियक्रोष्टुने प्रियक्रोष्टोः नुमचिरेति नुट् प्रियक्रोष्टूनां सुलु सुलुनी सुलूनि सुल्वा सुलुना॥

सि·कौ १८

धातृ धातृणी धातॄणि हे धातः हे धातृ धात्रा धातृणा एवं ज्ञातृ कर्त्रादयः एच इग्घ्रस्वादेशे आदिश्यमानेषु ह्रस्वेषु मध्ये एच
इगेव स्यात् प्रद्यु प्रद्युनी प्रद्यूनि प्रद्युना इह न पुंवत् यद्यपि गतं प्रद्यु इति तस्य भाषितपुंस्कत्वाभावात् एवमग्रेपि प्ररि प्ररि
णी प्ररीणि प्ररिणा एकदेशविकृतस्यानन्यत्वात् प्रायो हलीत्यात्वं प्रराभ्यां प्रराभिः नुमचिरेति तुड्यात्वे प्रराणामिति माध
वः वस्तुतस्तु सन्निपातपरिभाषया नुड्यात्वं न नामीति दीर्घस्त्वारंभसामर्थ्यात्परिभाषां बाधते इत्युक्तं प्ररीणां सुतु
सुतुनी सुतूनि सुतुना सुतुने इत्यादि इत्यजंतनपुंसकलिंगाः हो ढः हस्य ढः स्यात् झलि पदांते च हल्ङ्याब्भ्य इति सु
लोपः पदांतत्वाड्ढः जश्त्वचर्त्वे लिट् लिड् लिहौ लिहः लिहं लिहौ लिहः लिहा लिड्भ्यां लिट्सु लिट्त्सु॥
दादेर्धातोर्घः उपदेशे दादेर्धातोर्हस्य घः स्यात् झलि पदांते च उपदेशे किं अधोगित्यत्र यथा स्यात् दामलिहमा
त्मन इच्छति दामलिह्यति ततः क्विप् दामलिट् अत्र माभूत् एकाचो बशो भष् झषंतस्य स्ध्वोः धातोरवयवो य एका
च् झषंतस्तदवयवस्य बशः स्थाने भष् स्यात् सकारे ध्वशब्दे पदांते च एकाचो धातोरिति समानाधिकरणत्वेनान्वये तु विह
निलोपः नस्यात् गर्दभमाचष्टे गर्दभयति ततः क्विप् गर्धप् झलीति निवृत्तं स्ध्वोर्ग्रहणसामर्थ्यात् तेनेह न दुग्धं दोग्धा व्यपदे
व शिवद्भावेन धात्ववयवत्वात् भष्भावः जश्त्वचर्त्वे धुक् धुग् दुहौ दुहः षत्वचर्त्वे धुक्षु वा द्रुहमुहष्णुहष्णिहां एषां
हस्य वा घः स्यात् झलि पदांते च धुक् धुग् धुट् धुड् दुहौ दुहः धुग्भ्यां धुड्भ्यां धुक्षु धुट्सु एवं मुहष्णुहष्णिहां इग्य धुट्त्सु।
णः संप्रसारणं यणः स्थाने प्रयुज्यमानो य इक् स संप्रसारणसंज्ञः स्यात् वाह ऊठ् भस्य वाहः संप्रसारणमूठ् स्यात्
संप्रसारणाच्च संप्रसारणादचि पूर्वरूपमेकादेशः स्यात् एत्येधत्यूठ्सु विश्वौहः विश्वौहा छंदस्येवण्विरिति राम १८
पक्षे तु णिजंता क्विप्॥ चतुरनडुहोराम् उदात्तः अनयोराम् स्यात् सर्वनामस्थाने परे स चोदात्तः सावनडुहः अस्य तु म्

२अनड्वाहं।अनड्वाहो।

सोपरे आदित्यधिकारादवर्णात्परोयंनुम् अतोविशेषविहितेनापिनुमाआम्नबाध्यते आमाचनुम्नबाध्यते सोर्लोपः
नुम्विधिसामर्थ्याद्वसुस्रंस्वितिदत्वंनसंयोगांतलोपस्यासिद्धत्वान्नलोपोन अनड्वान् अमसंबुद्धौ चतुरनडुहोरम्स्यात्त
संबुद्धौ आमोपवदः हेअनड्वन् अनड्वाहौ अनड्वाहः अनडुहः अनडुहा वसुस्रंसुध्वंस्वनडुहांदः सांतवस्वंतस्यस्रंसादेश्च
दःस्यात्पदांते अनडुद्भ्यां सांतेतिकिं विद्वान् पदांतेकिं स्रस्तं ध्वस्तं सहेःसाडःसः साडूपस्यसहेःसस्यमूर्द्धन्यादेशःस्यात् तु
तुरासाहः रासाट् तुरासाड् तुरासाहौ तुरासाड्भ्यां तुरंसहत्तइत्यर्थे छंदसिसहइतिण्विलोकेतुसाहयतेःक्विप् अन्येषामपीतिपूर्वपदस्यदी
र्घः दिवऔत् दिविवितिशतिपदकस्यौत्स्यात्सोपरे अल्विधित्वेनस्थानिवंत्वाभावाद्धल्ङ्याबितिलोपोन सुद्यौः सुदिवौसु
दिवः सुदिवं सुदिवौ दिवउत् दिवोंतादेशउकारःस्यात्पदांते सुद्युभ्यां सुद्युषु चत्वारः चतुरः चतुर्भिः षट्चतुर्भ्यश्च षट्संज्ञ
केभ्यश्चतुरश्चपरस्यामोनुडागमःस्यात्णत्वेद्वित्वं चतुर्णां रोःसुपि सप्तमीबहुवचनेपरेरोरेवविसर्जनीयोनत्वन्यस्यरेफस्यष
त्वंषस्यद्वित्वेप्राप्ते शरोचि अचिपरेशरोनद्वेस्तः चतुर्षु प्रियचत्वाः हेप्रियचत्वः प्रियचत्वारौ गौणत्वेतुनुडूनेष्यते प्रियचतु
रां प्राधान्येतुस्यादेव परमचतुर्णां कमलं कमलौ वा आचक्षाणः कमल् कमलौ कमलः षत्वं कमलषु मोनोधातोः
धातोर्मस्यनःस्यात्पदांते नत्वस्यासिद्धत्वान्नलोपोन प्रशाम्यतीति प्रशान् प्रशामौ प्रशामः प्रशान्भ्यां किमःकः किमः
कःस्याद्विभक्तौ अकच्सहितस्याप्ययमादेशः कः कौ के कं सर्ववत् इदमोमः इदमोमःस्यात्सौ त्यदाद्यत्वापवादः इदो
यपुंसि इदमइदःस्यान्नियुस्यात्सोपुंसि सोर्लोपः अयं त्यदाद्यत्वं पररूपत्वंच दश्च इदमोदस्यमःस्याद्विभक्तौ इमौ इमे त्यद
दादेःसंबोधनंनास्तीत्युत्सर्गः अनाप्यकः अककारस्यइदमइदोन्स्यादापिविभक्तौ आबितिटाइत्यारभ्यसुपःपकारेणप्रत्या
हारः अनेन हलिलोपः अककारस्यइदमइदोलोपःस्यादापिहलादौ नानर्थकेलोंऽन्त्यविधिरनभ्यासविकारे आद्यंतवदेकस्मि

सि॰ कौ॰ १५

ऐ

न स्यकस्मिन्क्रियमाणं कार्यमादाविवांतवत्स्यात् आभ्यां नेदमदसोरकोः अककारयोरिदमदसोर्भिस ऐस् न स्यात् एभिः एवं
अत्वं नित्यत्वात्तत्र ङेस्मै प्यष्ट्वा हलि लोपः अस्मै आभ्यां एभ्यः अस्मात् अस्य अनयोः एषां अस्मिन् अनयोः एषु ककारयोगे
तु अयकं इमकौ इमके इमकाभ्यां इमकैः इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ अन्वादेशविषयस्येदमोऽनुदात्तोऽश् आदेशः
स्यात्तृतीयादौ अशवचनं साकच्कार्थं इमकाभ्यां रात्रिरधीता आभ्यां दिनमधीयते द्वितीयाटौस्स्वेनः द्वितीयायां टौसोश्च प
रत इदमेतदोरेनादेशः स्यात् अन्वादेशविषये किंचित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः यथा
नेन व्याकरणमधीतमेनं छंदोऽध्यापयेति अनयोः पवित्रं कुलमेनयोः प्रभूतं स्वमिति एनं एनौ एनान् एनेन एनयोः गणयते
र्विच् सुगण् सुगणौ सुगणः सुगणं त्सु सुगण्सु क्विपि तु अनुनासिकस्य क्विझलोः क्ङितीति दीर्घः सुगां सुगाणौ सुगाणः सु
गाण् ट्सु सुगाण्सु परत्वादुपधादीर्घः हल्ङ्यादिलोपः नतोनलोपः राजा न ङिसंबुद्ध्योः नस्य लोपो न स्यान्ङौ संबुद्धौ च हे
राजन् छंदस्युदाहरणं सुपांसुलुगिति ङेर्लुक् निषेधसामर्थ्यात् प्रत्ययलक्षणं परमेव्योमन् ङावुत्तरपदे प्रतिषेधो वक्तव्यः ब्र चर्मणि तिलाश्रय चर्मतिलः
ह्मणि निष्ठा अस्य ब्रह्मनिष्ठः राजानौ राजानः राजानं राजानौ अल्लोपोऽनः अत्वं न चाल्लोपः स्यात् निवृत्त पूर्वत्रासिद्धेत्तन्नि
षेधात् नापि बहिरंगतयासिद्धः यथोद्देशपक्षे षाष्ठीपरिभाषा न तु असिद्धत्वस्यासिद्धतया अंतरंगाभावे परिभाषाया अप्रवृ
त्तेः जत्रोश्चः राज्ञः राज्ञा नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति सुप्विधौ स्वरविधौ संज्ञाविधौ कृति तुग्विधौ च नलोपोऽसि
द्धो नान्यत्र राजाश्व इत्यादौ इत्यसिद्धत्वादात्वमेत्वमैस्त्वं च न राजभ्यां राजभिः राज्ञे राजभ्यां राजभ्यः राज्ञः २ राज्ञोः राज्ञां।।
राजनि राज्ञि प्रतिदीव्यतीति प्रतिदिवा प्रतिदिवानौ प्रतिदिवानः अस्य भविषये अल्लोपे कृते हलि च रेफवांतस्य धातोरुपधाया राम
इकोदीर्घः स्यात् हलि न चाल्लोपस्य स्थानिवत्त्वं दीर्घविधौ तन्निषेधात् बहिरंगपरिभाषात् कृत्यायेन न प्रवर्त्तते प्रतिदीव्नः प्रतिदी १५
व्ने इत्यादि यज्वा नसंयोगाद्वमंतात् वकारमकारांतसंयोगात्परस्यानोकारस्य लोपो न स्यात् यज्वना यज्वभ्यां ब्रह्मणः ब्रह्म

यज्वनः इत्यादि

प्रातिपदिकांतनुम्विभक्तिषु चेति

णः इन्हन्पूषार्यम्णांशौ एषां शावेवोपधायादीर्घो नान्यत्र इति निषेधे प्राप्ते सौ च इन्नादीनामुपधाया दीर्घः स्यादसंबुद्धौ
सौ परे वृत्रहा हे वृत्रहन् एकाजुत्तरपदे णः इति णत्वं वृत्रहणौ वृत्रहणः वृत्रहणं वृत्रहणौ हो हंतेर्ञ्णिन्नेषु ञिति णिति प्रत्य
ये नकारे च परे हंतेर्हस्य कुत्वं स्यात् हंतेः उपसर्गस्थान्निमित्तात्परस्य हंतेः नस्य णत्वं स्यात् प्रहण्यात् अत्पूर्वस्य हंतेरत्पू
र्वस्यैव नस्य णत्वं नान्यस्य प्रघ्नंति योगविभागसामर्थ्यादनंतरस्य विधिर्वा प्रतिषेधो वेति न्यायं बाधित्वा एकाजुत्तरे इति णत्वम
पि निवर्त्यते नकारे परे कुत्वविधिसामर्थ्यादल्लोपो न स्थानिवत् वृत्रघ्नः वृत्रघ्ना यत्तु वृत्रघ्न इत्यादौ वैकल्पिकं णत्वं माधवे
नोक्तं तद्भाष्यवार्त्तिकविरुद्धं एवं शार्ङ्गिन् यशस्विन् अर्यमन् यशस्विन्निति विन्प्रत्यये इनोनर्थकत्वेपि इन्हन् वृषन्
त्यत्र ग्रहणं भवत्येव अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदंतविधिं प्रयोजयंतीति वचनात् अर्यमणि अर्यम्णि पू
ष्णि पूषणि मघवा बहुलं मघवन्शब्दस्य वा तृ इत्यंतादेशः स्यात् ऋ इत् उगिदचां सर्वनामस्थानेऽधातोः अधातोरुगि
तो नलोपिनोऽचतेश्च नुमागमः स्यात्सर्वनामस्थाने परे उपधादीर्घः मघवान् इह दीर्घे कर्त्तव्ये संयोगांतलोपस्यासिद्धत्वं न
भवति बहुलग्रहणात् तथा च श्वन्नुक्षन्निति निपातनान्मघशब्दान्मतुपा च भाषायामपि शब्दद्वयसिद्धिमाश्रित्यैतत्सूत्रं
प्रत्याख्यातमाकरे हविर्जक्षिति निःशंको मखेषु मघवानसाविति भट्टिः मघवंतौ मघवंतः हे मघवन् मघवंतं मघवं
तौ मघवतः मघवता मघवद्भ्यां इत्यादि तृत्वाभावे मघवा छंदसीवनिपौ चेति वनिबंतं मघोराद्यंतं छंदस्येव अंतो
दात्तं तु लोकेपीति विशेषः मघावानो मघवानः सुटि राजवत् श्वयुवमघोनामतद्धिते अन्नंतानां भसंज्ञानामेषामतद्धिते
परे संप्रसारणं स्यात् संप्रसारणाच्च आद्गुणः मघोनः अन्नंतानां किं मघवतः मघवता स्त्रियां मघवती अतद्धिते इति
किं माघवनं मघोना मघवभ्यां शुनः शुना श्वभ्यां युवन्शब्दे वस्योत्वे कृते न संप्रसारणे संप्रसारणं संप्रसारणे परतः

पूर्वस्य यणः संप्रसारणं न स्यात् इति यकारस्य नेत्वं अतएव ज्ञापकादंत्यस्य यणः पूर्वं संप्रसारणं यूनः यूना युवभ्यां अ
र्वा हे अर्वन् अर्वणस्त्रसावनञः नञा रहितस्यार्वन्नंतस्यांगस्य तृ इत्यंतादेशः स्यान्न तु सौ उगित्वान्नुम् अर्वन्तौ अर्वन्तः
अनञः किं अनर्वा यज्वावत् पथिमथ्यृभुक्षामात् एषामाकारोंतादेशः स्यात्सौ परे आ आदिति प्रश्लेषेण शुद्धाया ए
व वृद्धेर्विधानान्नानुनासिकः इतोत्सर्वनामस्थाने पथ्यादेरिकारस्याकारः स्यात्सर्वनामस्थाने थोन्थः पथिमथो
स्थस्य न्थादेशः स्यात्सर्वनामस्थाने पंथाः पंथानौ भस्य टेर्लोपः भसंज्ञकस्य पथ्यादेष्टेर्लोपः स्यात् पथः पथा पथि
भ्यां एवं मथः ऋभुक्षाः स्त्रियां नान्तलक्षणो ङीप् भत्वाट्टिलोपः सुपथी सुमथी नगरी अनृभुक्षी सेना आत्वं न पुं
सकेन भवति न लुमतांगस्येति प्रत्ययलक्षणनिषेधात् सुपथिकुलं संबुद्धौ वा नपुंसकानां नलोपो वाच्यः हे सुपथिन् हे सुप
थि नलोपः सुप्स्वरेति नलोपस्यासिद्धत्वाद्ध्रस्वस्य गुणेन न द्विवचने अनपुंसकस्येत्युक्तेः सर्वनामस्थानत्वात् भत्वाट्
ट्टिलोपः सुपथी शेः सर्वनामस्थानत्वात्सुपंथानि पुनस्तथैव सुपथा सुपथे ष्णांता षट् षांता नांताश्च संख्या षट्सं
ज्ञा स्यात् षड्भ्यो लुक् पंचसंख्या किं विप्रुषः पामानः शतानि सहस्राणीत्यत्र सन्निपातपरिभाषया न लुक् सर्वनामस्था
न सन्निपातेन कृतस्य नुमस्तद्विघातकत्वात् पंचभिः पंचभ्यः षट्चतुर्भ्यश्चेति नुट् नोपधायाः नांतस्योपधाया दीर्घः स्यात्
तु नामि नलोपः पंचानां पंचसु परमपंच परमपंचानां गौणत्वे न लुग्नुटौ प्रियपंचा प्रियपंचानौ प्रियपंचः एवं सप्तन् नवन् दश
न् अष्टन आ विभक्तौ अष्टन आत्वं स्याद्धलादौ विभक्तौ अष्टाभ्य औश् कृताकारादष्टनः परयोर्जश्शसोरौश् स्यात् अष्टभ्य
इति वक्तव्ये कृतात्वनिर्देशो जश्शसोर्विषये आत्वं ज्ञापयति वैकल्पिकं चेदमष्टन आत्वं अष्टनो दीर्घादिति सूत्रे दीर्घग्रह
णाज्ज्ञापकात् अष्टौ परमाष्टौ अष्टाभिः अष्टाभ्यः २ अष्टानां अष्टासु आत्वाभावे अष्टपंचवत् गौणत्वे त्वात्वाभावे राजव

इत्यादि
३प्रियाष्टाभ्यः३

न् शासिप्रियाष्ट्नः इहपूर्वस्मादपि विधौ वज्ञ्लोपस्यस्थानिवद्भावान्नुङ् त्वं कार्यकालपक्षे वहिरंगस्याल्लोपस्यासिद्धत्वाद्वापि
याष्ट्नौ जश्शसोरनुमीयमानमात्वं बाधात्यस्वनन्तरोक्ता प्रांतेनप्रियाष्ट्नः हलादावेवैकल्पिकमात्वं प्रियाष्टा [illegible]
[illegible] प्रियाष्टभ्यां प्रियाष्टभिः प्रियाष्टासु प्रियाष्ट्नो राजवत् सर्वं हाहावच्चापरं हलि भष्भावः जश्त्वं चर्त्वं च भुत्
भुद् बुधौ बुधः बुधा भुद्भ्यां भुत्सु ऋत्विग्दधृक्स्रग्दिगुष्णिगंचुयुजिक्रुंचां च एभ्यः क्विन्स्यात् आलालंच्छिकमव
द पिकिं चित्कार्यं निपातनाज्ञेयते निरुपपदं युजेः क्विन् कनावितौ कृदतिङ् सन्निहितेधात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः स्या
त् वेरपृक्तस्य अपृक्तस्य वस्य लोपः स्यात् कृत्तद्धितेति प्रातिपदिकसंज्ञात्वात्स्वाद्यः युजेरसमासे युजेः सर्वनामस्थाने नुम्स्यात्
असमासे संयोगान्तलोपः क्विन्प्रत्ययस्य कुः क्विन्प्रत्ययो यस्मात्तस्य कवर्गोन्तादेशः स्यात्पदान्ते नस्य कुत्वेन ङकारः।
ति युङ्। नश्चापदांतस्यैनुमोनुस्वारः परसवर्णः तस्यासिद्धत्वाच्चोः कुरिति कुत्वं न युञ्जौ युञ्जः युञ्जं युञ्जौ युजः युग्भ्यां अस युञ्जा
मासे किं चोः कुः चवर्गस्य कवर्गोन्तादेशः स्याज्झलि पदान्ते च इति कुत्वं क्विन्प्रत्ययैति कुत्वस्यासिद्धत्वात् सुयुक् सुयुजौ स्ये
सुयुजः युजेरिति धातुपाठपठितेकारविशिष्टस्यानुकरणं न त्विकारनिर्देशः तेनेह न युज्यते समाधौ इति युक् युजसमा
धौ दैवादिक आत्मनेपदी संयोगांतस्य लोपः खन् खंजौ खजः व्रश्चेति षत्वे जश्त्वचर्त्वे राट् राड् राजौ राजः राड्सु राट्सु
एवं विभ्राट् देवेट् देवेजौ विश्वसृट् इह यजिसृज्योः कुत्वं नेति क्वौ वक्ष्यते परिमृट् षत्वविधौ राजिसाहचर्याद्भ्राजृदीप्
ता विफ़रणस्त्विव ग्रह्यते यस्तु एजृ भ्राजृ दीप्तावितितस्य कुत्वमेव विभ्राक् विभ्राजौ परौ व्रजेः षः पदांते परावुपपदे व्रजेः क्वि
प्स्यात् दीर्घश्च पदांतविषये षत्वं च परित्यज्य सर्वं व्रजतीति परिव्राट् परिव्राजौ परिव्राजः विश्वस्य वसुराटोः विश्वशब्दस्य दी
र्घः स्याद्वसौ राट् शब्दे च परे विश्वं वसु यस्य स विश्वावसुः राटिति पदांतोपलक्षणार्थं चर्त्वविवक्षांत विश्वाराट् विश्वाराड्।।

व्रश्चेति सूत्रेण विधीयमानषत्वस्य कुत्वापवादत्वात्।४

सि॰कौ
२१

भ्रट्

विश्वराजौविश्वराजः विश्वाराड्भ्यां स्कोःसंयोगाद्योरंतेच पदांतेझलिच यःसंयोगस्तदाद्योःसकारककारयोर्लोपःस्यात्
भ्रट् सस्य श्चुत्वेन शस्तस्य जश्त्वेन जः भ्रज्जौ भ्रज्जः ऋत्विगित्यादिना ऋतावुपपदे यजेः क्विन् क्विन्नंतत्वात्कुत्वं ऋत्वि
क् ऋत्विजौ ऋत्विजः रात्सस्येति नियमान्न संयोगांतलोपः चोःकुः ऊर्क् ऊर्ग् ऊर्जौ ऊर्जः त्यदाद्यत्वं पररूपत्वं त
दोःसःसावनंत्ययोः त्यदादीनां तकारदकारयोरनंत्ययोः सः स्यात्सौ परे स्यः त्यौ त्ये सः तौ ते परमसः परमतौ पर
मते द्विपर्यंतानामित्येव नेह त्वं नचतकारोच्चारणसामर्थ्यात्क्लैबेति वाच्यं अतित्वमिति गौणे चरितार्थत्वात् संज्ञायां गौ द्वि५
णत्वे चात्वसत्वेन त्यद् त्यदौ त्यदः अतित्यद् अतित्यदौ यः यौ ये एषः एतौ एते अन्वादेशे त्वेनं एनौ एनान् एनेन
एनयोः २ ङे प्रथमयोरम् युष्मदस्मद्भ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीययोश्चामादेशः स्यात् मपर्यंतस्येत्यधिकृत्य
त्वाहौ सौ युष्मदस्मदोर्मपर्यंतस्य त्व अह एतावादेशौ स्तः सौ परे शेषे लोपः आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मद
स्मदोरंत्यलोपः स्यात् अतो गुणे अमि पूर्वः त्वं अहं ननु त्वं स्त्री अहं स्त्री इत्यत्र त्व अम् अह अम् इति स्थिते अमि
पूर्वरूपं परमपि बाधित्वा अंतरंगत्वाट्टाप्प्राप्नोतीति सत्यं अलिंगे युष्मदस्मदी इति न स्त्रीत्वाभावान्न टाप् यद्वा शेषे इति स
प्तमी स्थानिनोधिकरणत्वविवक्षया तेन मपर्यंतात् शेषस्य अम् अम् इत्यस्य लोपः स च परोप्यंतरंगेत्तो गुणे कृते प्रवर्त्तते ते
न अदंतत्वाभावान्न टाप् परमत्वं अतित्वं परमाहं अत्यहं युवावौ द्विवचने द्वयोरुक्तौ युष्मदस्मदोर्मपर्यंतस्य युवावौ
स्तो विभक्तौ प्रथमायाश्च द्विवचने भाषायां इह युष्मदस्मदोराकारोंतादेशः स्यात् औङ इत्येव सुवचं भाषायां किं राम
युवं वस्त्राणि युवां आवां मपर्यंतस्य किं साकच्कस्य मा भूत् युवकां आवकां त्वया मयेत्यत्र त्व्या म्येति मा भूत् युवकाभ्यां आ ५२ २१
वकाभ्यामिति च न सिध्येत् यूयवयौ जसि यूयं वयं परमयूयं परमवयं अतियूयं अतिवयं इह शेषे लोपोंत्यलोपः पक्षे जसः शी

रसकारभ शभ्यांशुपा श्चत्वंसु तारः ११=॥

अनित्वमित्यत्र गौणत्वे सर्वनामसंज्ञाभावेपि त्वाहादेशयोरंतरंगकार्यत्वाभावात्प्रदीगोधिकारेतस्यचतदंतस्य च ग्रहण (आपामि ३) इति १
मितिकथमदस्मदंतस्यापि अगस्य त्वाहाद्यभवति अनित्यदादौ तु अत्वसत्वयोः सर्वनामांतगणभूतत्वप्रादिकृत्येत्वान्नभवति ।
गण

अवर्णीतात् गात् परस्य सर्वनाम्नो विहितं इति व्याख्यानात् १०
स्याम

त्व १ तु १ अचे

वा १

पात् अग्रे कार्ये कृते पुनर्नांगकार्यमिति न भवति ङेप्रथमयो रित्यत्र मकारांतरं प्रश्लिष्य अस्समांतस्यैव शिष्यते न तु विक्रियत इति
व्याख्यानाद्वा त्वमावेकवचने एकस्योक्तौ युष्मदस्मदोर्मपर्यंतस्य त्वमौ स्तः द्वितीयायां च युष्मदस्मदोराकारः स्यात् त्वां मां
युवां आवां शसोन नेत्यविभक्तिकं युष्मदस्मद्भ्यां परस्य शसो नकारः स्यात् अमोपवादः आदेः परस्य संयोगांतस्य लोपः॥
युष्मान् अस्मान् टौस्यचि अनयोर्यकारादेशः स्यात् तादेशे जादौ परे त्वया मया युष्मदस्मदोरनादेशे अनयोराकारः स्याद्
नादेशे हलादौ परे युवाभ्यां आवाभ्यां युष्माभिः अस्माभिः तुभ्यमह्योर्ङयि अनयोर्मपर्यंतस्य तुभ्यमह्यौ स्तो ङयि अमा
देशः शेषे लोपः तुभ्यं मह्यं परमतुभ्यं परममह्यं युवाभ्यां आवाभ्यां भ्यसो भ्यम् भ्यमभ्यमवादेशः स्यात् आदौ शेषे लोपः
पत्युत्यं मे लोपे एवं अत्रांगवृत्तिपरिभाषया एत्वं न अभ्यमस्तु पक्षद्वयेपि साधुः युष्मभ्यं अस्मभ्यं एकवचनस्य च आभ्यां पंचम्ये
कवचनस्य अत् स्यात् त्वत् मत् ङसेश्चेति सुवचं युवाभ्यां आवाभ्यां पंचम्या अत् आभ्यां पंचम्या भ्यसो अत् स्यात् युष्मत् अ
स्मत् तवममौ ङसि अनयोर्मपर्यंतस्य तवममौ स्तो ङसि युष्मदस्मद्भ्यां ङसोश् तव मम परमतव परममम अतितव
अतिमम योचि युवयोः आवयोः सामाकं आभ्यां परस्य साम आकं स्यात् भाविनः सुटो निवृत्त्यर्थं ससुट्कनिर्देशः युष्माकं
अस्माकं त्वयि मयि युवयोः आवयोः युष्मासु अस्मासु समस्यमाने द्व्येकत्ववाचिनी युष्मदस्मदी समासार्थोन्यसं
ख्यश्चेत्तदा युवावौ त्वमावपि सुजस्ङेङस्सु परतः आदेशाः स्युः सदैव ते त्वाहौ युवयोः तुभ्यमह्यौ तव ममा अपि एते पर
त्वद्बाधंते युवावौ विषये त्वेके त्वमावपि युवा बाधंते पूर्वविप्रतिषेधतः द्व्येकसंख्यः समासार्थो बह्वर्थे युष्मदस्मदी तयोर्द्व्ये
कतार्थत्वान्न युवावौ त्वमौ न च॥ त्वां मां वा अतिक्रांत इति विग्रहे अतित्वं अत्यहं अतित्वां अतिमां अतियूयं अतिवयं
अतित्वां २ अतिमां २ अतित्वान् अतिमान् अतित्वया अतिमया अतित्वाभ्यां ३ अतिमाभ्यां ३ अतित्वभिः अतिमाभिः

युष्मदस्मदर्थगतसंख्येतरसंख्यायुक्तश्चेदित्यर्थः १४

युष्मदस्मदोः सर्वसंख्यत्वेपि सुजस्ङेङस्सु परतः त्वाहादय आदेशाभवंत्येवेत्यर्थः १४

साम इत्यत्र सो न तालुस्थानषष्ठीकस इति पृथक्पदं ६

[illegible] एवं

अतितुभ्यं
अतिमह्यं

आ

अतित्तुभ्यम् अतिमह्यम् अतित्वभ्यं अति अतिमभ्यं ङसिभ्यसोः अतित्वत् अतिमत् भ्यामिष्वत् अतितव अतिमम
अतित्वयोः अतिमयोः अतित्वाकम् अतिमाकम् अतित्वयि अतिमयि अतित्वासु अतिमासु युवामावां वा अतिक्रांत इति
विग्रहे सुजस्ङेङस्सु प्राग्वत् औ अम् औट्सु अतियुवां अत्यावाम् ३ अत्यावान् अतियुवान् अतियुवया अत्यावया अ
तियुवाभ्याम् ३ अतिआवाभ्याम् ३ अतियुवाभिः अत्यावाभिः भ्यसि अतियुवभ्यम् अत्यावभ्यम् ङसिभ्यसोः अति
युवत् अत्यावत् ओसि अतियुवयोः अ[illegible]वयोः २ अतियुवाकम् अत्यावाकम् अतियुवयि अतिआवयि अतियुवासु
अत्यावासु युष्मान् अस्मान् वेति विग्रहे सुजस्ङेङस्सु प्राग्वत् औ अम् औट्सु अतियुष्मां ३ अत्यस्मां ३ अतियुष्मात् अत्य
स्मात् अतियुष्मया अत्यस्मया अतियुष्माभ्यां अत्यस्माभ्यां अतियुष्माभिः अत्यस्माभिः भ्यसि अतियुष्मभ्यं अत्यस्मभ्यं॥
ङसिभ्यसोः अतियुष्मत् अत्यस्मत् ओसि अतियुष्मयोः अतिअस्मयोः २ अतियुष्माकम् अत्यस्माकम् अतियुष्मयि
अत्यस्मयि अतियुष्मासु अत्यस्मासु पदस्य पदात् अनुदात्तं सर्वमपादादौ इत्यधिकृत्य युष्मदस्मदोः षष्ठीचतुर्थी
द्वितीयास्थयोर्वान्नावौ पदात्परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वान्नावित्यादेशौ स्तस्तौ चानुदात्तौ ब
हुवचनस्य वस्नसौ उक्तविधयोरनयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः वान्नावोरपवादः तेमयावेकवचनस्य उ
क्तविधयोरनयोः षष्ठीचतुर्थ्येकवचनान्तयोस्तेमे स्तौ स्तः त्वामौ द्वितीयायाः द्वितीयैकवचनान्तयोस्त्वामा एतौ स्तः
श्रीशस्त्वावतु मापीह दत्तात्ते मेपि शर्म सः स्वामी ते मेपि स हरिः पातु वामपि नौ विभुः २ सुखं वां नौ ददात्वीशः पतिर्वाम
पि नौ हरिः सोऽव्याद्वो नः शिवं वो नो दद्यात् सेव्योत्र वः स नः पदस्य परयोः किं वाक्यादौ मा भूत् त्वां पातु मां पातु अ
पादादौ किं वेदैरशेषैः संवेद्यो ऽस्मान्कृष्णः सर्वदावतु स्थग्रहणाच्छ्रूयमाने विभक्तिकयोरेव नेह इतियुष्मत्पुत्रो

अविद्यमानं पूर्वं पदं यस्मात्तस्मात्प्रथमान्तादित्यर्थः ।6

ते२

ब्रवीति इत्यस्मत्सुचो ब्रवीति समानवाक्ये निघातयुष्मदस्मदादेशाश्च वक्तव्याः एकतिङ् वाक्यं तेनेह न ओदनं प
चतव भविष्यति इह तु स्यादेव शालीनां त ओदनं दास्यामीति एते वांनावादयस्त्वन्वादेशे ऽनन्वादेशे वा वक्तव्याः
अन्वादेशे तु नित्यं स्युः धाता ते भक्तोऽस्ति धाता तव भक्तोऽस्तीति वा तस्मै ते नमः इत्येवं नचवाहाहैवयुक्ते चादिपंचकयो
गे नैते आदेशाः स्युः हरिस्त्वां मां च रक्षतु कथं त्वां मां वा न रक्षेदित्यादि युक्तग्रहणात् साक्षाद्योगे ऽयं निषेधः परंपरासंबं
धे तु आदेशः स्यादेव हरो हरिश्च मे स्वामी पश्यार्थैश्चानालोचने अचाक्षुषज्ञानार्थैर्धातुभिर्योगे नैते आदेशाः स्युः चेतसा त्वां समी
क्षते परंपरासंबंधे ऽप्ययं निषेधः भक्तस्तव रूपं ध्यायति आलोचने तु भक्तस्त्वा पश्यति चक्षुषा सपूर्वायाः प्रथमाया विभाषा वि
द्यमानपूर्वात्प्रथमान्तात्परयोरन्वादेशेऽप्यादेशा वा स्युः ॥ भक्तस्त्वमप्यहं तेन हरिस्त्वां त्रायते स मां त्वा मेति वा सामंत्रितं ।
संबोधने या प्रथमा तदंतमामंत्रितसंज्ञं स्यात् आमंत्रितं पूर्वमविद्यमानवत्स्यात् अग्ने तव देवास्मान्पाहि अग्ने नय ब्रह्म
ईश्वर रूप इह युष्मदस्मदोरादेशास्तिङन्तनिघात आमंत्रितनिघातश्च न सर्वदा रक्ष देव न इति त्वन्नादेश वेत्यस्या विद्यमा
नवत्त्वाद्वेपितः प्राची नरक्षेत्येतदाश्रित्यादेशाः एवं इमं मे गंगे यमुने इति मंत्रे यमुने इत्यादिभ्यः प्राचीनामंत्रिताविद्
द्यमानवत्त्वाद्वेपि मे इत्येतदाश्रित्य सर्वेषां निघातः नामंत्रिते समानाधिकरणे सामान्यवचनम् विशेष्यं समानाधिकरणे
विशेषणे आमंत्रिते परे नाविद्यमानवत्स्यात् हरे दयालो नः पाहि अग्ने तेजस्विन् विभाषितं विशेषवचने अत्र भाष्यं बहु
वचनमिति वक्तव्यमिति बहुवचनांतं विशेष्यं समानाधिकरणे विशेषणे आमंत्रिते परे ऽविद्यमानवद्वा स्यात् स्वयंप्रभवो देवाः श
आ रण्या युष्मान्भजे देवाः शरण्या वो भजे इत्यन्वादेशेऽपि वैकल्पिक आदेशः सुपात् सुपात् सुपदः सुपादस् सुपादौ पादः पत् । सुपादौ
पादंतं यद्भं तदवयवस्य पादस्य पदादेशः स्यात् सुपदः सुपदा सुपाद्भ्यामित्यादि अग्निं मथ्नातीति अग्निमत् ॥

नामं

नोवप्रत्ययइत्यपिपाठः ४७ सर्वलोपिप्रत्ययान्तेइत्यर्थः ७

सि॰ कौ॰ २३ ति अग्निमद् अग्निमथौ अग्निमथः अग्निमद्भ्यामित्यादि ऋत्विगादिसूत्रेण अंचेः सुप्युपदे क्विन् अनिदितां ह
लउपधायाः क्ङिति हलंतानामनिदितामंगानामुपधाया नस्य लोपः स्यात्किति ङिति च उगिदचामिति नुम्॥
संयोगान्तस्यलोपः नुमो नकारस्य क्विन्प्रत्ययस्यकुरितिकुत्वेन ङः प्राङ् अनुस्वारपरसवर्णौ प्राञ्चौ प्राञ्चः प्राञ्चं प्रा
ञ्चौ अचः लुप्तनकारस्यांचतेर्भस्याकारस्यलोपः स्यात् चौ लुप्तनकाराकारेंचतौ पूर्वस्याणो दीर्घः स्यात्॥
प्राचः प्राचा प्राग्भ्यामित्यादि प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः प्रत्यंचम् प्रत्यञ्चौ अच इति लोपस्य विषये अंतरंगोपि यण्
नप्रवर्त्तते अकृतव्यूहा इति परिभाषया प्रतीचः इत्यादि अमुमंचतीति विग्रहे अदस् अंच इति स्थिते विष्वग्देवयो
श्चटेरद्र्यंचतावप्रत्यये अनयोः सर्वनाम्नश्च टेरद्र्यादेशः स्यादप्रत्ययांते अंचतौ परे अदद्रि अंच इति स्थिते यण् अद
सोऽसेर्दादु दो मः अदसोसान्तस्य दात्परस्य उदूतौ दो मश्च उ इति ह्रस्वदीर्घयोः समाहारद्वन्द्वः आंतरतम्याद्
व ह्रस्वव्यंजनयोर्ह्रस्वो दीर्घस्य दीर्घः अमुमुयङ् अमुमुयञ्चौ अमुमुयञ्चः अमुमुयञ्चम् अमुमुयञ्चौ अमुमुईचः अ
मुमुईचा अमुमुयग्भ्यामित्यादि मुत्वस्यासिद्धत्वान्नयण् अन्यवाधेनास्य देशस्येति परिभाषामाश्रित्य परस्यैव मु
त्वंवदतां मते अदमुयङ् अः से सकारस्यस्थाने य॒ स्या अः सेरिति व्याख्यानात्त्यदाद्यत्वविषय एव मुत्वं नान्य
त्रेति पक्षे अदद्र्यङ् उक्तं च अदसोद्रेः पृथङ्मुत्वं केचिदिच्छंति लत्ववत् केचिदंत्यसदेशस्येत्येके ऽसेर्हि दृश्यते
विष्वग्देवयोः किं अश्वाची अंचतौ किं विष्वग्युक् अप्रत्यये किं विष्वगंचनं अप्रत्ययग्रहणं ज्ञापयति अन्यत्र धा
तुग्रहणे तदादि विधिरिति तेनायस्कारः उदङ् उदञ्चौ उदञ्चः उद ईत् उदःपरस्य लुप्तनकारस्यांचतेर्भस्याकार राम
स्य ईत्स्यात् उदीचः उदीचा उदग्भ्यामित्यादि समः समि अप्रत्ययांते अंचतौ परे समः समि आदेशः स्यात् सम्यङ् सम्यञ्चौ २३

प्रो स्वे: ३

सम्यञ्चः समीचः समीचा सहस्य सध्रिः सध्र्यङ् तिरसस्तिर्यलोपे अलुप्ताकारेंचतावप्रत्ययांतेपरेतिरसस्तिर्यादेशः स्यात्॥
तिर्यङ् तिर्यञ्चौ तिर्यञ्चः तिर्यञ्चं तिर्यञ्चौ तिरश्चः तिरश्चा तिर्यग्भ्यामित्यादि नांचेः पूजायां पूजार्थस्यांचतेरुपधायान
स्यलोपोन नलोपाभावादकारलोपोन प्राङ् प्राञ्चौ अलुप्तनकारत्वान्ननुम् प्रांचः प्रांचा प्राङ्भ्यामित्यादि प्राङ्क्षु प्राङ्षु ए
वं पूजार्थे प्रत्यङ्ङादयः क्रुंच कौटिल्याल्पीभावयोः अस्य ऋत्विगादिना नलोपाभावोपि निपात्यते क्रुङ् क्रुञ्चौ क्रुञ्चः क्रु
ङ्भ्यामित्यादि चोः कुः पयोमुक् पयोमुग् पयोमुचौ पयोमुचः व्रश्चेति षत्वं स्कोरिति सलोपः जश्त्वचर्त्वे सुवृट् सुवृ
ड् सुवृश्चौ सुवृश्चः सुवृट्त्सु सुवृट्सु महत्पूजायां वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च। एते निपात्यंते शतृवच्चैषां
कार्यं स्यात् उगित्वान्नुम् सांतमहतः इति दीर्घः मह्यते पूज्यते इति महान् महांतौ महांतः हे महन् महतः महता मह
या द्भ्यामित्यादि अत्वसंतस्य चाधातोः अत्वंतस्योपधाया दीर्घः स्याद्धातुभिन्नासंतस्य चासंबुद्धौ परे परं नित्यं च नुमं बाधित्वाव
चनसामर्थ्यादादौ दीर्घः ततो नुम् धीमान् धीमन्तौ धीमन्तः हे धीमन् शसादौ महद्वत् धातोरप्यत्वंतस्य दीर्घः गोमंत
मिच्छति गोमानिवाचरति वा क्यजंताद्वा चारक्विबंताद्वा कर्त्तरि क्विप् उगिदचामिति सूत्रे ऽञ्ग्रहणं नियमार्थं धातोश्चे
दुगित्कार्यं तर्ह्यंचतेरेवेति तेन स्रत् ध्वत् इत्यादौ न अधातोरिति तु अधातुभूतपूर्वस्यापि नुमर्थं गोमान् गोमंतौ गोमंतः
इत्यादि भातेर्डवतुः भवान् भवंतौ भवंतः शत्रंतस्य तु अत्वंतत्वाभावान्न दीर्घः भवतीति भवन् भवंतौ भवंतः उभे
अभ्यस्तं षाष्ठद्वित्वप्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्तसंज्ञे स्तः नाभ्यस्ताच्छतुः अभ्यस्तात्परस्य शतुर्नु
मन्न स्यात् ददत् ददतौ ददतः जक्षित्यादयः षट् षड् धातवोन्ये जक्षितिश्च सप्तमः एते अभ्यस्तसंज्ञाः स्युः जक्षत् ज
क्षतौ जक्षतः एवं जाग्रत्। दरिद्रत् शासत् चकासत् दीधीवेव्योः ङित्त्वेपि छांदसत्वाद्व्यत्ययेन परस्मैपदं दीध्यत्

तू

अतिप्रत्ययांतः

सि·कौ
२४

वेवत् गुपृ गुपौ गुपः गुब्भ्यामित्यादि त्यदादिषु दृशोनालोचने कञ्च त्यदादिषूपपदेष्वज्ञानार्थात् दृशेर्धातोः क
ञ्स्यात् चात् क्विन् आसर्वनाम्नः सर्वनाम्न आकारोंतादेशः स्यात् दृक्दृश वतुप्सु कुत्वस्यासिद्धत्वात् व्रश्चेति षः तस्य ज
श्त्वेन डः तस्य कुत्वेन गः तस्य चर्त्वेन पक्षे कः तादृक् तादृग् तादृशौ तादृशः षत्वापवादत्वात् कुत्वेन खः इति कैय
टहरदत्ताश्मितेतु चर्त्वाभावपक्षे खएव श्रूयते न तु गः जश्त्वं प्रति कुत्वस्यासिद्धत्वात् दिगादिभ्यो यदिति निर्दे
शान्नासिद्धत्वमिति वा बोध्यम् व्रश्चेति षत्वं भजस्त्वचर्त्वे विट् विड् विशौ विशः नशेर्वा नशेः कवर्गोंतादेशः स्या
नड्भ्यां त्पदांते नक् नग् नट् नड् नशौ नशः नग्भ्यामित्यादि स्पृशोनुदके क्विन् अनुदके सुप्युपपदे स्पृशेः क्विन्स्यात्
घृतस्पृक् घृतस्पृग् घृतस्पृशौ घृतस्पृशः क्विन्प्रत्यययोयस्मादिति बहुव्रीह्याश्रयणात् क्विप्यपि कुत्वं स्पृक् षडगकाः स्पृग्
प्रागवत् त्रिधृषाप्रागल्भ्ये अस्मादृत्विगादिना क्विन् द्वित्वमंतोदात्तत्वं च निपात्यते कुत्वात्पूर्वं जस्त्वेन डः गः कः
धृष्णोतीति दधृक् दधृग् दधृषौ दधृषः दधृग्भ्यामित्यादि रत्नानि मुष्णातीति रत्नमुट् रत्नमुड् रत्नमुषौ रत्नमु
षः रत्नमुड्भ्यामित्यादि षड्भ्यो लुक् षट् षड् षड्भिः षड्भ्यः २ षट्चतुर्भ्यश्चेति नुट् अतान्मिति पर्युदासान्न
ष्टुत्वनिषेधः यरोनुनासिके इति विकल्पं बाधित्वा प्रत्यये भाषायां नित्यवचनात् नित्यमनुनासिकः षण्णां षट्सु नुडंतवि षट्त्सु
धिपरमषट् परमषड् परमषषः परमषण्णाम् गौणत्वे तु प्रियषट् प्रियषड् प्रियषषौ प्रियषषाम् रुत्वं प्रति षत्वस्यासि प्रियषषः
द्धत्वात् ससजुषो रुरिति रुत्वम् र्वोरुपधाया दीर्घ इकः रेफवांतस्य धातोरुपधाया इको दीर्घः स्यात् पदांते पिपठीः
पिपठिषौ पिपठिषः पिपठीर्भ्याम् वाशरीति वा विसर्जनीयः नुम्विसर्जनीयशर्व्यवायेपि सत्वे प्रत्येकं व्यवधाने राम
पीप्रक्रुभ्यां परस्य सस्य मूर्द्धन्यादेशः स्यात् ष्टुत्वेन पूर्वस्य षत्वम् पिपठीष्षु पिपठीःषु प्रत्येकमिति व्याख्यानात् २४

नेकव्यवधाने ॰ षत्वं न। निंस्व। निंस्से। तुमुग्रहणं तुमस्थानिकानुस्वारोपलक्षणार्थं व्याख्यानात्। तेनेह न। सुहिन्सु। पुंसु। अत्र
स्वशास्त्रग्रहणेन न गतार्थता। रात्सस्येति सलोपे विसर्गः। चिकीः। चिकीर्षौ। चिकीर्षः। रोः सुपीति नियमात् न विसर्गः। चिकी
र्षु। दमेर्डोः। डित्वसामर्थ्याट्टिलोपः। रुत्वविसर्गौ। दोः। दोषौ। दोषः। पद्दन्नित्यादिना दोषन्। दोषः। दोष्णः। दोर्भ्याम्। दोषभ्याम्। इ
त्यादि। विशां प्रवेशने सन्नन्तात् क्विप्। षत्वस्यासिद्धत्वात्संयोगान्तस्य लोपः। व्रश्चेति षः। जश्त्वचर्त्वे। विविट्। विविड्। विविक्षौ।
विविक्षः। स्कोरिति कलोपः। तट्। तड्। तक्षौ। तक्षः। इत्यादि। गोरट्। गोरड्। तद्धितर्हि भ्यामेवं तां भ्यां क्विपि तुस्कोरिति न प्रवर्त्त
ते णिलोपस्य स्थानिवद्भावात्। पूर्वत्रासिद्धीयेन स्थानिवदिति तु तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति निषिद्धम्।
तस्मात्संयोगान्तलोपस्य। तक्। तग्। गोरक्। गोरग्। कुत्वस्यासिद्धत्वात्संयोगान्तलोपः। पिपक्। पिपग्। पिपक्षौ। पिपक्षः।
स्वं विवक्। विवग्। दिधक्। दिधग्। पिसगतौ। सुष्ठु पेसतीति सुपीः। सुपिसौ। सुपिसः। सुपिसा। सुपीर्भ्यामित्यादि। सुपीष्षु। सुपी
षु। सुतूः। सुतुसौ। एवं ड्ने। विद्वान्। विद्वांसौ। विद्वांसः। वसोः संप्रसारणम्। वस्वन्तस्य भस्य संप्रसारणं स्यात्। पूर्वरूपत्वं ष
त्वं। विदुषः। विदुषा। वसुस्रंस्विति दत्वम्। विद्वद्भ्यामित्यादि। सेदिवान्। सेदिवांसौ। सेदिवांसः। अन्तरंगोपि इडागमः संप्रसा
रणविषये न प्रवर्त्तते। अकृतव्यूहा इति परिभाषया। सेदुषः। सेदुषा। सेदिवद्भ्यामित्यादि। सांतमहः इत्यत्र सांतसंयोगो
पि प्रातिपदिकस्यैव गृह्यते न तु धातोः। महच्छब्दसाहचर्यात्। सुष्ठु हिनस्तीति सुहिन्। सुहिंसौ। सुहिंसः। सुहिन्भ्याम्।
मित्यादि। सुहिन्सु। ध्वत्। ध्वसौ। ध्वसः। ध्वद्भ्यामित्यादि। स्वं ध्वत्। पुंसोऽसुङ्। सर्वनामस्थाने विवक्षिते पुंसोऽसुङादेशः स्यात्। उका
रउच्चारणार्थः। बहुपुंसीत्यत्र उगितश्चेति ङीव् अर्थे कृत्तेन पुंसोऽसुङि निवृत्य यस्येवा गित्वे न तु मस्सिद्धेः। पुमान्। हे पुम
न्। पुमांसौ। पुमांसः। पुंभ्यामित्यादि। पुंसु। ऋदुशनस्पुरुदंसोऽनेहसां चेत्यनङ्। उशना। उशनसौ। उशनसः। अस्य संबुद्धौ वानङ् नलोपश्च वा

पुंसः

सू॰ ३

स्कोरिति कलोपं प्रति

हे विद्वन् विद्वांसौ विद्वांसो।

गोरक्षौ। गोरक्षः

सि॰ कौ॰

२५ क

वाच्यः हे उशनन् हे उशन हे उशनः उशनोभ्यामित्यादि अनेहा कालः अनेहसौ अनेहसः हे अनेहः वेधाः वेधसौ वे
धसः हे वेधः वेधोभ्यामित्यादि अधातोरिति सूत्रे नेदीर्घः सुष्ठु वस्ते सुवः सुवसौ सुवसः पिण्डं ग्रसते पिण्डग्रः पिण्डग्लः
ग्रसुग्लसु अदसे सत्त्रौ सुलोपश्च अदस औकारोन्तादेशः स्यात्सौ परे सुलोपश्च तदोः सः सावनन्त्ययोरिति दस्य सः॥
असौ औत्वप्रतिषेधः साकच्कस्य वा वक्तव्यः सादुत्वं च प्रतिषेधसन्नियोगशिष्टमुत्वं तदभावे न प्रवर्त्तते असकौ असु
कः त्यदाद्यत्वं पररूपं वृद्धिः अदसोसेरिति मुत्वोत्वे अमू जशः शी आद्गुणः एत ईद्बहुवचने अदसो दात्परस्यैत ईत्स्यात्
दस्य च मो बहुर्थोक्तौ अमी पूर्वत्रासिद्धमिति विभक्तिकार्यं प्राक् पश्चाद् उत्वमत्वे अमुम् अमू अमून् [illegible] मुत्वे कृते घि
संज्ञायां नाभावः न मु ने नाभावे कर्त्तव्ये कृते मुभावो नासिद्धः स्यात् अमुना अमूभ्याम् अमीभिः अमुष्मै अ
मूभ्याम् अमुष्मात् अमुष्य अमीषाम् अमुष्मिन् अमुयोः अमीषु इति हलन्ताः पुल्लिंगाः नहो धः नहो द
स्य धः स्यात् झलि पदान्ते च उपानत् उपानद् उपानहौ उपानहः उपानहा उपानद्भ्याम् उपानत्सु उत्पूर्वात् स्निहेः क्वी।
वित्यस्मात् ऋत्विगादिना क्विन् निपातनात् षत्वं लोपश्च ते क्विन्प्रत्ययस्य कुः इति कुत्वेन हस्य घः जश्त्वचर्त्वे उष्णिक् उष्णिग् उ
ष्णिहौ उष्णिहः उष्णिग्भ्याम् उष्णिक्षु द्यौः दिवौ दिवः द्युभ्यां द्युषु गीः गिरौ गिरः एवं पूः चतुरश्चत्वारः चतुरः च
तसृः चतसृणाम् किमः कादेशो टाप् का के काः सर्ववत् यः सौ इदमोस्य यः स्यात्सौ इदमोमः इयम् त्यदाद्यत्वं टाप्
दश्च इति मः इमे इमाः इमां इमे इमाः अनया हलि लोपः आभ्याम् आभिः अस्यै अस्याः अनयोः आसां अस्यां अनयोः आ
सु अन्वादेशे तु एनां एने एनाः एनया एनयोः ऋत्विगादिना स्रजेः क्विन् अमागमश्च निपातितः स्रक् स्रग् स्रजौ स्रजः
स्रग्भ्याम् स्रक्षु त्यदाद्यत्वे स्या त्ये त्याः एवं तद् यद् एतद् वाक् वाग् वाचौ वाचः वाग्भ्यामित्यादि वाक्षु अपशब्दोनि

घ

अमीषु:

रा॰ ९१

राम २५

त्यं बहुवचनांतः अप्तृन्निति दीर्घः आपः अपः अपोभि अपत्तकारः स्यादादौ प्रत्यये परे अद्भिः अद्भ्यः अपां अप्सु ॥
दिक् दिग् दिशौ दिशः दिग्भ्यां दिक्षु त्यदादिष्विति दृशेः क्विन्विधानादन्यत्रापि कुत्वं दृक् दृग् दृशौ दृशः त्विट् त्वि
ड् त्विषौ त्विषः त्विड्भ्यां त्विट्सु ससजुषो रुरिति सजूः सजुषौ सजुषः सजूर्भ्यां सजूःषु रुत्वं आशीः आशिषौ आशिषः
आशीर्भ्यां असौ त्यदाद्यत्वं टाप् औङः शी उत्वमत्वे अमू अमूः अमूं अमूः अमुया अमूभ्यां अमूभिः अमुष्यै अमू
भ्यां अमूभ्यः अमुष्याः २ अमुयोः २ अमूषां अमुष्यां अमूषु इति हलंताः स्त्रीलिंगाः स्वमोर्नपुंसकात् दत्वं ॥
स्वनडुत् स्वनडुद् स्वनडुही चतुरनडुहोरित्याम् स्वनड्वांहि पुनस्तद्वत् शेषं पुंवत् दिवउत् विमलद्यु अहः अं
तर्वर्तिनीं विभक्तिमाश्रित्य पूर्वपदस्यैवोत्तरखंडस्यापि पदसंज्ञायां प्राप्तायां उत्तरपदत्वे चापदादिविधौ प्रतिषेधः इति
प्रत्ययलक्षणेन विमलदिवी विमलदिवि अपदादिविधौ किं दधिसेचौ इह षत्वप्रतिषेधे कर्तव्ये पदत्वमस्त्ये सात्पदाद्योरिति
व कुत्वे तु न वाः वारी अझलंतत्वान्न नुम् वारि चत्वारि २ नलुमतेति कादेशेन किम् के कानि इदं इमे इमानि
अन्वादेशे नपुंसके एनद्वक्तव्यः एनत् एने एनानि एनेन एनयोः २ ब्रह्म ब्रह्मणी ब्रह्माणि हे ब्रह्मन् हे ब्रह्म रो
सुपि अहन्निति विभाषाङिश्योः अह्नी अहनी अहानि अहन् अहन्नित्यस्य रुः स्यात्पदांते अहोभ्यां अ
होभिः इह अहः अहोभ्यामित्यादौ रेत्वरुत्वयोरसिद्धत्वान्नलोपे प्राप्ते अहन्नित्यावर्त्य नलोपाभावं निपा
त्य द्वितीयेन रुर्विधेयः तस्यापि रुत्वरत्वे दीर्घाण्यहानि यस्मिन्सा दीर्घाहा निदाघः इह हल्ङ्यादिलोपे प्रत्य
यलक्षणेन सुपीति निषेधाद्रत्वाभावे रुः तस्यासिद्धत्वान्नांतलक्षणउपधाया दीर्घः संबुद्धौ तु हे दीर्घाहो निदा
घ दीर्घाहाणौ दीर्घाहानः दीर्घाह्नः दीर्घाह्ना दीर्घाहोभ्यां दीर्घाहस्सु दंडि दंडिनी दंडीनि सुग्विस

ग्विणी स्रग्वी एिं वाग्मि वाग्मिनी वाग्मी नि बहुवृत्रहाणि बहुपूषाणि बह्वर्यमाणि असृजः पदान्ते कुत्वं सृजेः क्वि
नो विधानात् विश्वसृड्ङ्गादेशेन सृजिदृशोरिति सूत्रे रज्जुसृड्भ्यामिति भाष्यप्रयोगात् यद्वा व्रश्चादिसूत्रे सृजियज्योः
पदान्ते षत्वं कुत्वापवादः स्रग् ऋत्विगित्यादौ तु निपातनादेव कुत्वं असृक् प्राह्वस्तु असृयतेरौणादिके क्विप्रत्यये वोद्धुः
असृक् असृग् असृजी असृंजि पद्दन्निति वा असन् असानि असृजा अस्ना असृग्भ्यां असभ्यां इत्यादि ऊर्क् ऊ
र्जौ ऊर्ञ्जि नरजानां संयोगः बहूर्ञ्जि नुम्प्रतिषेधः अन्यत्रत्वा नुम् बहूर्जि बहूर्ञ्जि वा कुलानि त्यत् त्ये त्या
नि तत् ते तानि यत् ये यानि एतत् एते एतानि अन्वादेशे तु एनत् बेभिद्यतेः क्विप् बेभित् बेभिद् बेभिदी बेभो
अल्लोपस्य स्थानिवत्त्वात् अकलंतत्वान्नलुम् अजंतत्वलक्षणस्तु नुम्न स्वविधौ स्थानिवत्त्वाभावात् बेभिदि ब्राह्मण
कुलानि चेच्छिदि गवाक् प्राक् स्य रूपाणि क्लीबे शंचाग्गति भेदतः असंध्यवङ् पूर्वरूपैर्नवाधिक शतंमतम् स्व
स्रुष्वुन वष्ठङ्गादेष त्केस्य ताणि जश्शसोः चत्वारि शेषेदशाकेरूपाणि तिविभावय २ तथा हि गामञ्चतीति विग्र
हे क्विगादिनाक्विन् गतो नलोपः अवङ् स्फोटायनस्येत्यवङ् गवाक् गवाग् सर्वत्र विभाषेति प्रकृतिभावे
गोअक् गोअग् पूर्वरूपे गोक् गोग् पूजायां नस्य कुत्वेन ङः गवाङ् गोअङ् गोङ् अम्यप्येतान्येव नव औङः
शीभत्वादचइत्यल्लोपः गोची पूजायां तु गवाञ्ची गोअञ्ची गोञ्ची जश्शसोः शिः शि सर्वनामस्थानित्वान्नु
म् गवाञ्चि गोअञ्चि गोञ्चि गतिपूजनयोस्त्रीण्येव गोचा गवाञ्चा गोअञ्चा गोञ्चा गवाग्भ्यां गोअग्भ्यां
गोग्भ्यां गवाङ्भ्यां गोअङ्भ्यां सुपि तु ङान्तानां ङ्णोः कुक्टुक् शरि इति कुक् गवाङ्क्षु गोअङ्क्षु गोङ्क्षु अवाङ्क्षु गोअ
ङ्क्षु गोङ्क्षु गवाक्षु गोअक्षु गोक्षु न चेह चयो द्वितीया शरीति पक्षे ककारस्य खकारेण षत्वे माधिकं स्यात्

कथं चर्त्वस्यासिद्धत्वात् कुक्पक्षे तु जस्यासिद्धत्वाज्जश्त्वाभावे पक्षे द्वितीयादेशस्त्वी णिरूपाणि वर्द्धन्त एव ऊह्यमेषां द्विर्वचना
नुनासिकविकल्पनात् रूपाणि पञ्चा द्विभेदानि भवंतीति मनीषिभिः ५२७ तिर्यक् तिरश्ची तिर्यंचि पूजायांतु तिर्यंची य तिर्यङ्।
कृत् यकृती यकृंति पद्दन्नेति वा यकन् यकानि यक्ना यकृता शकृत् शकृती शकृंति शकानि शक्ना शकृता ददत्॥
तुदत्। ददती वा नपुंसकस्य अभ्यस्तात्परो यः शतुरवयवस्तदंतस्य [redacted] क्लीबस्य नु
म्वा स्यात् सर्वनामस्थाने ददंति ददति आच्छीनद्योर्नुम् अवर्णान्तादंगात्परो यः शतुरवयवस्तदंतस्यांगस्य वा नुम् स्यात् शीन
द्योः परयोः तुदंती तुदती तुदंति भात् भांती भाती भांति पचत् शप्श्यनोर्नित्यं शप्श्यनोरात्परो यः शतुरवयवस्तदंतस्य
नित्यं नुम् स्यात् शीनद्योः परतः पचंती पचंति दीव्यत् दीव्यंती दीव्यंति स्वप् स्वपी नित्यात्परादपि नुमः र्वगप्लितिदी
धनेरुस। र्घः प्रतिपदोक्तत्वात् स्वांपि निरवकाशत्वं प्रतिपदोक्तत्वमिति पक्षे तु षष्ठते नत्वद्विरहान्नुमेव स्वंपि स्वपा अपोभि स्वद्भ्यां
स्वद्भिः धनंती त्यादिन्नाउत्स धनस्यासिद्धत्वात्तत्वं धनुः धनुषी सांतेति दीर्घः नुम्विसर्जनीयेति षत्वम् धनूंषि धनुषा धनुर्भ्यां
एवं चक्षुर्हविरादयः पिपठिषतेः क्विपूर्वोरिति दीर्घः पिपठीः पिपठिषी अज्झोपस्यस्थानिवत्वात् हलंतलक्षणोनुम्न त्व वि धौ
स्थानिवत्वाभावादजंतत्वलक्षणोपि नुम्न पिपठिषि पिपठीर्भ्यां पयः पयसी पयांसि पयसा पयोभ्यां सुपुम् सुपुंसी सुपुमांसि
अदः विभक्तिकार्यं उत्वमत्वे अमू अमूनि शेषं पुंवत् इति हलंतानपुंसकलिंगाः स्वरादिनिपातमव्ययं स्वरादयो निपा
ताश्चाव्ययसंज्ञाः स्युः स्वर्· अंतर्· प्रातर्· पुनर्· सनुतर्· उच्चैस्· नीचैस्·ˇ ऋधक्· ऋते· युगपत्· आरात्· पृथक्· ह्यस्· श्व शनैस्
स्· दिवा· रात्रौ· सायं· चिरं· मनाक्· ईषत्· (जोषत्) जोषं· तूष्णीं· बहिस्· अवस् समया· निकषा· स्वयं· वृथा· नक्तं· नञ्·
हेतौ· इद्धा· अद्धा· सामिवत्· ब्राह्मणवत्· क्षत्रियवत्· सना· [illegible]· सनत्· सनात्· तिरस्· अंतरा· अंतरेण· ज्योक्· कं· शं सह

उपधा

सि·कौ२७ सह·विना·नाना·स्वस्ति·स्वधा·अलं·वषट्·श्रौषट्·वौषट्·अन्यत्·अस्ति·उपांशु·क्षमा·विहायसा·दोषा·मृषा·मिथ्या·मुधा
पुरा·मिथो·मिथस्·प्रायस्·मुहुस्·प्रवाहुकम्·प्रवाहिका·आर्यहलं·अभीक्ष्णम्·साकं·सार्द्धं·नमस्·हिरुक्·धिक्·अम· अथ२
२ प्रतान् आम्·प्रताम्·प्रशान्·मा·माङ्। आकृतिगणोयम् च·वा·ह·अह·एव·एवं·नूनं·शश्वत्·युगपत्·भूयस्·कूपत्·सूपत्·कु
वित्·नेत्·चेत्·चण·कच्चित्·यत्र·नह·हंत·माकिः·माकीम्·नकिः·माङ्। नञ्·यावत्·तावत्·त्वै·न्वै·द्वै·रै·श्रौषट्·वौष औकी४
ट्·स्वाहा·स्वधा·वषट्·तुम्·तथाहि·किल·खलु·अथ·सुष्ठु·आहह·उपसर्गविभक्तिस्वरप्रतिरूपकाश्च अवदत्तं·अ स्प५
हंयुः·अस्तिक्षीरा·अ·आ·इ·ई·उ·ऊ·ए·ऐ·ओ·औ·पशु·शुकं·यथा कथा·च·पाट्·प्याट्·अंग·है·हे·भोः·अये·
द्य·विषु·एकपदे·युत्·आतः चादिरप्याकृतिगणः तद्धितश्चासर्वविभक्तिः यस्मात्सर्वा विभक्तिर्नोत्पद्यते स तद्धितां
तोव्ययं स्यात् परिगणनं कर्तव्यं तसिलादयः प्राक्पाशपः शस्प्रभृतयः प्राक्समासांतेभ्यः·अम्·आम्·कृत्वोर्थाः·तसि
वती·नानाञाविति·तेनेह न पचतिकल्पं·पचतिरूपं कृन्मेजंतः कृद्यो मांत एजंतश्च तदंतमव्ययं स्यात्·स्मारं स्मारं।
जीवसे·पिबध्यै क्त्वातोसुन्कसुनः एतदंतमव्ययं स्यात् कृत्वा·उदेतोः विसृपः अव्ययीभावश्च·अधिहरि अव्ययादाप्
सुपः अव्ययाद्विहितस्यापः सुपश्च लुक्स्यात् तत्र शालायां अथ विहि विशेषणात्येह अस्तद्वेसौ·अव्ययसंज्ञायां
यद्यपि तदंतविधिरस्ति तथापि न गौणे आबुद्धहणांव्ययमलिंगत्वात्·सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु वचनेषु च स
र्वेषु यन्न व्येति तदव्ययम् इति श्रुतिर्लिंगकारकसंख्याभावपराः वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः आपं चै
व हलंतानां यथा वाचा निशा दिशा·अवगात्·वगात्·अवगाहः·वगाहः अपिधानं·पिधानं इत्यव्ययानि ॥ ॥ ॥ राम२७
स्त्रियाम् अधिकारोयम् समर्थानामिति यावत् अजाद्यतष्टाप् अजादीनामकारांतस्य च वाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप्स्या

त् अजाद्युक्तिर्ङीषोऽङीपश्च बाधनाय अजा अतः खट्वा अजादिभिः स्त्रीत्वस्य विशेषणान्नेह पंचाजी अत्र हि समासार्थस
माहारनिष्ठं स्त्रीत्वं अजा एडका अश्वा चटका मूषिका एषु जातिलक्षणो ङीष् प्राप्तः बाला वत्सा होडा मंदा विला
द्द ता एषु वयसि ङीप् प्राप्तः संभस्त्राजिनशणपिंडेभ्यः फलात् संफला भस्त्रफला अजिनफला शणफला पिंड
फला ङ्यापोरिति ह्रस्वः सदच्कांडप्रांतशतैकेभ्यः पुष्पात् सत्पुष्पा प्राक्पुष्पा प्रत्यक्पुष्पा शूद्रा चामहत्पूर्वा जातिः पुं
योगे तु शूद्री अमहत्पूर्वा किं महाशूद्री क्रुंचा उष्णिहा देवविशा ज्येष्ठा कनिष्ठा मध्यमेति पुंयोगेपि कोकिला जातावपि
मूलान्नञः अमूला ऋन्नेभ्यो ङीप् कर्त्री दंडिनी उगितश्च उगिदंतात्प्रातिपदिकात्स्त्रियां ङीप् स्यात् भवंती पचंती शप् तदंतात्र
श्यनोर्नित्यमिति नुम् भांती भाती तुदंती तुदती उगिच्चामिति [redacted]ः सूत्रेऽज्ग्रहणेन धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेवेति नियम्यते तेनह य
ते न उखास्रत् ङीप् अनिदितामिति नलोपः पर्णध्वत् अंचेस्तु स्यादेव प्राची प्रतीची वनोरच वन्नंतात्तदंतात्प्रातिपदिकात्
स्त्रियां ङीप् स्याद्रश्चांतादेशः वनिति ङ्वनिप् क्वनिप् वनिपां सामान्यग्रहणं अत्प्ययग्रहणे यस्मात्स विहितस्तदादेस्तदंत
तां स्य ग्रहणं तेन प्रातिपदिकविशेषणात्तदंतमपि लभ्यते सुत्वानमतिक्रांता अतिसुत्वरी अतिधीवरी शर्वरी वनो न हश
तदंतांतात्र ४ इति वक्तव्यं हशंताद्धातोर्विहितो यो वन् तदंतात्प्रातिपदिकात् ङीप्रश्च नेत्यर्थः ओणृ अपनयने विच् वनिप् विड्वनोरित्या
वा ३ त्वं अवावा ब्राह्मणी राजयुध्वा बहुव्रीहौ बहुधीवरी बहुधीवा पक्षेऽडाबस्ते पादोन्यतरस्यां पाच्छब्दांतात्समासांतः
तदंतात्प्रातिपदिकान्ङीब्वा स्यात् द्विपदी द्विपात् टाबृचि ऋचि वाच्यायां पादंताट्टाप् स्यात् द्विपदा ऋक् एकपदा नष
ट्स्वस्रादिभ्यः पंच चतस्रः पंचेत्यत्र नलोपे कृते षिण्णांतात्षडिति षट्संज्ञा प्रति नल्लोपः सुप्स्वरेति न लोपस्यासिद्धत्वान्न

षट्स्वस्रादिभ्य इति न टाप् मनः मन्नन्तान्ङीप् सीमा सीमानौ अनो बहुव्रीहेः अन्नन्ताद्बहुव्रीहेर्न ङीप् बहुयज्वा बहुय
ज्वानौ डाबुभाभ्यामन्यतरस्याम् सूत्रद्वयोपात्ताभ्यां डाप् वा स्यात् सीमा सीमे दामा दामे दामानौ नपुंसि दामेत्यमरः बहुय
ज्वा बहुयज्वे [redacted] अन उपधालोपिनोऽन्यतरस्याम् अन्नन्ताद्बहुव्रीहेरुपधा
लोपिनो वा ङीप् स्यात् पक्षे डाप्प्रतिषेधौ बहुराज्ञी बहुराज्यौ बहुराजे बहुराजानौ प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः
प्रत्ययस्थात्कात्पूर्वस्याकारस्येकारः स्यादापि परे स चाप्सुपः परो न चेत् सर्विका कारिका अतः किं नौका प्रत्ययस्थात्
किं शक्नोतीति शका असुपः किं बहुपरिव्राजका नगरी कात्किं नंदना पूर्वस्य किं परस्य मा भूत् कटुका तपरः किं
राका आपि किं कारकः मामकनरकयोरुपसंख्यानं मामिका नरान् कायतीति नरिका त्यक्त्यपोश्च दाक्षिणा
त्यिका इहत्यिका न यासयोः यका सका यत्तदोरस्येत्त्वं न स्यात् यकां तकाम् त्यकन्श्च प्रतिषेधः उपत्यका अधि
त्यका आशिषि वुनश्च न जीवका भवका उत्तरपदलोपे तु देवदत्तिका देवका क्षिपकादीनां च क्षिपका ध्रुवका
कन्यका चटका तारका ज्योतिषि अन्यत्र तारिका वर्णका तान्तवे अन्यत्र वर्णिका वर्तका शकुनौ प्राचां उदीचां
तु वर्तिका अष्टका पितृदेवत्ये अष्टिकान्या सूतकापुत्रिकावृंदारकाणां वेति वक्तव्यं इह वा अ इति छेदः कात्पू
र्वस्य अकारादेशो वेत्यर्थः तेन पुत्रिका शा इ ईनेश्वर्णस्य पक्षे अकारः अन्यत्रेत्त्वबाधनार्थमकारस्यैव पक्षे अ
कारः सूतका सूतिका इत्यादि उदीचामातः स्थाने यकपूर्वायाः यकपूर्वस्य स्त्रीप्रत्ययाकारस्यास्थाने योऽकार
स्तस्य कात्पूर्वस्येद्वा स्यादापि परे केऽण इति ह्रस्वः आर्यका आर्यिका चटकका चटकिका आतः किं सांकाश्ये
भवा सांकाश्यिका यकेति किं अश्विका स्त्रीप्रत्ययः किम् शुभं यातीति शुभंयाः अज्ञाता शुभंयाः शुभंयिका

धात्वंतयकोस्तु नित्यं सनयिका सुपाकिका भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि स्वेत्यंतं लुप्तषष्ठीकं पदम् एषामत इद्वा स्या
त् तदंतविधिनैव सिद्धे नञ्पूर्वाणामपीति यद्दर्शनं स्पष्टार्थम् भस्त्राग्रहणमुपसर्जनार्थं अन्यस्य तूत्तरसूत्रेण सिद्धं॥
एषाद्वाग्रहणयोस्तु सर्वयोर्नित्यं अंतर्वर्तिनीं विभक्तिमाश्रित्यात्र पद इति प्रतिषेधात् अनेषका परमेषका अद्वके परमद्वके॥
स्वशब्दग्रहणं संज्ञोपसर्जनार्थं इह हि आतः स्थाने इत्यनुवृत्तं स्वशब्दस्य तु विशेषणं न तु द्वयोरसंभवात् नाप्यन्येषां अव्य
भिचारात् स्वशब्दस्त्वनुपसर्जनमात्मीयवाची अकजंतः अर्थांतरे तु न स्वी संज्ञोपसर्जनीभूतस्तु कषप्ययांतत्वाभावेऽपि सुहादर
णं एवं चात्मीयायां स्विकेत्यपरमस्विकेति नित्यमेवेत्वं निर्भस्त्रका निर्भस्त्रिका एषका एषिका कृतषत्वनिर्देशान्नेह विक
ल्पः एतिके एतिकाः अजका अजिका ज्ञका ज्ञिका द्वके द्विके निःस्वका निःस्विका अभाषितपुंस्काच्च एतस्माद्विहि
तस्यातः स्थाने अत इद्वा स्यात् गंगका गंगिका बहुव्रीहेर्भाषितपुंस्कान्नतो विहितस्य नित्यं अज्ञाता अखट्वा अखट्विका॥
शेषिकेऽपि विकल्प एव आदाचार्याणां पूर्वविषये आद्वा स्यात् गंगाका उक्तपुंस्कान्नतु शुभ्रिका अनुपसर्जनात्॥
अधिकारोयं यूनस्तिरिति व्याप्य अयमेव स्त्रीप्रत्ययेषु तदंतविधिं ज्ञापयति टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्
क्वरपः अनुपसर्जनं यत् टिदादि तदंतं यददंतं प्रातिपदिकं ततः स्त्रियां ङीप् स्यात् कुरुचरी उपसर्जनत्वान्नेह बहुकुरुचरा
नदट् नदी वक्ष्यमाणोऽत्र टित्वादुगित्वाच्च ङीप्सिद्धः पाठस्तु ङित्वेन ल्यप्रत्ययमनुबंधकार्यं नादेशानामिति ज्ञापनार्थं भवत
ति ष्णः स्थाने चःस्थितेन क्वचिदनुबंधकार्येऽप्यनल्विधाविति निषेधज्ञापनाद्वा सौपर्णेयी ऐंद्री औत्सी ऊरुद्वयसी ऊ
रुदघ्नी ऊरुमात्री पंचतयी आक्षिकी लावणिकी यादृशी इत्वरी नाचीत्यिकेऽपि चौरी नञ्स्नञीकक्ख्युंस्तरु
णतलुनानामुपसंख्यानं स्त्रैणी पौंस्नी शाक्तीकी आढ्यंकरणी तरुणी तलुनी यञश्च यञंतात्स्त्रियां ङीप् स्यात्॥

द्वीपादनुसमुद्रंयञ्इतिभवार्थेशैषिकोयञ्॥२

सि॰कौ॰२६ अकारस्लोपेकृते हलस्तद्धितस्य हल उत्तरस्य तद्धितयकारस्योपधाभूतस्य लोपः स्यादीतिपरे गार्गी अनपत्याधिका
रस्थान्नङीप् द्वीपे भवा द्वैप्या अधिकारग्रहणात् देवस्यापत्यं दैव्या देवाद्यञञाविति हि प्राग्दीव्यतीयो न त्वप
त्याधिकारपठितः प्राचां ष्फ तद्धितः यञन्तात् ष्फो वास्यात् स्त्रियां स च तद्धितः षः प्रत्ययस्य प्रत्ययस्यादेः ष इ
त्स्यात् आयनेयीनीयियः फढखछघां प्रत्ययादीनां प्रत्ययादिभूतानां फादीनां क्रमादायन्नादय आदेशाः
भवन्ति तद्धितान्तत्वात्प्रातिपदिकत्वं षित्वसामर्थ्यात् फेरणो नेति पित्स्त्रीत्वे षिद्गौरेति वक्ष्यमाणो ङीष् गार्ग्यायणी ॥
सर्वत्र लोहितादिकतन्तेभ्यः लोहितादिभ्यः कतशब्दान्तेभ्यो यञन्तेभ्यो नित्यं ष्फः स्यात् लौहित्यायनी कात्या
यनी कौरव्यमाण्डूकाभ्यां च आभ्यां ष्फः स्यात् क्रमेण टाप्ङीषोरपवादः कुर्वादिभ्यो ण्यः कौरव्यायणी ढ
क्मण्डूकादित्यण् माण्डूकायनी आसुरेरुपसंख्यानं आसुरायणी वयसि प्रथमे प्रथमवयोवाचिनोऽदन्ता
त्स्त्रियां ङीप् स्यात् कुमारी वयस्यचरम इति वाच्यं वधूटी चिरंटी वधूटचिरंटशब्दौ यौवनवाचिनौ अतः
किम् शिशुः कन्यायां न कन्यायाः कनीन चेति निर्देशात् द्विगोः अदन्ताद्द्विगोः ङीप् स्यात् त्रिलोकी अजा
दित्वात्त्रिफला त्र्यनीका अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि अपरिमाणान्ताद्बिस्ताद्यन्ताच्च द्वि
गोर्ङीप् न स्यात् तद्धितलुकि सति पञ्चभिरश्वैः क्रीता पञ्चाश्वा आर्हीयष्ठक् अध्यर्द्धेति लुक् द्वौ बिस्तौ पचति द्विबि
ता स्ता द्व्याचिता द्विकम्बल्या परिमाणान्तु द्व्याढकी तद्धितलुकि किम् समाहारे पञ्चाश्वी काण्डान्तात् क्षेत्रे
क्षेत्रे यः काण्डान्तो द्विगुस्ततो न ङीप् स्यात् तद्धितलुकि सति द्वे काण्डे प्रमाणमस्याः द्विकाण्डा क्षेत्रभक्तिः प्रमाणे राम२६
द्वयसजिति विहितस्य मात्रचः प्रमाणे लो द्विगोर्नित्यमिति लुक् क्षेत्रे किं द्विकाण्डी रज्जुः पुरुषात्प्रमाणेऽन्यत

सुवर्णबिस्तो हेम्नोऽक्षे। आचितो दश भाराः स्युः। भारः पलानां सहस्रद्वयं। कंबल्यमूर्णापलशतं॥३

रस्यां प्रमाणे यः पुरुषस्तदंताद्द्विगोर्ङीब्वा स्यात् न तद्धितलुकि द्वौ पुरुषौ प्रमाणमस्याः सा द्विपुरुषी द्विपुरुषा परिखा ॥ स्वा
ऊधसोनङ्‌ ऊधोन्तस्य बहुव्रीहेरनङादेशः स्यात्स्त्रियां इत्यनङि कृते डाप्प्रतिषेधेषु प्राप्तेषु बहुव्रीहेरूधसो ङीष् ऊधो ङीप्‌र
न्ताद्बहुव्रीहेर्ङीष्स्यात्स्त्रियां कुंडोध्नी स्त्रियां किम् कुंडोधो धैनुकं इह नङपि न तद्धितौ स्त्रियामित्युपसंख्यानात् संख्या अ
व्ययादेर्ङीप् ङीषोपवादः द्व्यूध्नी अत्यूध्नी बहुव्रीहेरित्येव ऊधोऽतिक्रांता अत्यूधाः दामहायनांताच्च संख्या
देर्बहुव्रीहेर्दामांताद्धायनांताच्च स्त्रियां ङीप् स्यात् दामांते डाप्प्रतिषेधयोः प्राप्तयोः हायनांते टाप्प्राप्ते वचनं द्विदाम्नी
अव्ययग्रहणान्नतु उन्नेरुद्दामा वडवेत्यत्र डाप्प्रतिषेधावपि पक्षेत्युक्तः द्विहायनी बाला त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यं
वयोवाचकस्यैव हायनस्य ङीप् णत्वं चेष्यते त्रिहायणी चतुर्हायणी वयसोन्यत्रा द्विहायना चतुर्हायना शाला ति
त्यसंज्ञाछंदसोः अन्नंताद्बहुव्रीहेरुपधालोपिनो ङीप् स्यात् संज्ञाछंदसोः सुराज्ञी नाम नगरी अन्यत्र पूर्वेण विकल्प
एव वेदे शततमूध्नी केवलमामकभागधेयपापापरसमानार्यकृतसुमंगलभेषजाच्च एभ्यो नवभ्यो नित्यं ङीप् स्या
त् संज्ञाछंदसोः अपोनः इड केवली विश्वाः इत्यादि मामकी भागधेयी पापी अपरी समानी आर्यकृती सुमंगली
भेषजी अन्यत्र केवला इत्यादि मामकग्रहणं नियमार्थं अणंतत्वादेव सिद्धेः तेन लोके संज्ञायां मामिका ॥
अंतर्वत्पतिवतोर्नुक् एतयोर्नुक् स्यात् स्त्रियां ऋन्नेभ्यो ङीप् गर्भिण्यां जीवत्भर्तृकायां च प्रकृतिभागौ निपात्ये
ते तत्रांतरस्ति अस्यां गर्भ इति विग्रहे अंतःशब्दस्याधिकरणशक्तिप्रधानतयास्तिसमानाधिकरण्याभावाद्प्रा
प्तो मतुप् निपात्यते पतिवत्नीत्यत्र वत्वं निपात्यते अंतर्वत्नी पतिवत्नी प्रत्युदाहरणं तु अंतरस्त्यस्यां शालायां घ
टः पतिमती पृथ्वी पत्युर्नो यज्ञसंयोगे पतिशब्दस्य नकारादेशः स्याद्यज्ञेन संबंधे वसिष्ठस्य पत्नी तत्कर्तृकस्य

तु

सि·कौ ३० यज्ञस्यफलभोक्त्रीत्यर्थः दंपत्योः सहाधिकारात् विभाषासपूर्वस्य पतिशब्दान्तस्यसपूर्वस्यप्रातिपदिकस्यनोवास्या
त् गृहस्यपतिः गृहपतिः गृहपत्नी अनुपसर्जनस्येत्येतोनेहार्थमनुवर्त्तमपितत्पदस्यविशेषणं किंतुतदंतस्य तेनब
हुव्रीहावपि दृढपत्नी दृढपतिः वृषलपत्नी वृषलपतिः अथ वृषलस्यपत्नीतिव्यस्ते कथमिति चेत् पत्नीवपत्नी
त्युपचारात् यद्वा आचारक्विबंतात्कर्त्तरिक्विप् अस्मिन्पक्षे पतियौ पतियः इतिइयङ्विषये विशेषः सपू
र्वस्यकिम् गवांपतिः स्त्री नित्यंसपत्न्यादिषु पूर्वविकल्पापवादः समानस्यसभावोनिपात्यते समानः पतिर्यस्याः पि
सा सपत्नी एकपत्नी वीरपत्नी पूतक्रतोरैच अस्यस्त्रियामैकारादेशोभवति इयंचत्रिसूत्रीपुंयोगेएवइष्यते ॥
पूतक्रतोःस्त्री पूतक्रतायी ययातुक्रतवः पूताः पूतक्रतुरेवसा वृषाकप्यग्निकुसितकुसिदानामुदात्तः एषामुदा ३
त्तऐकारादेशः स्यात् ङीप्च वृषाकपेः स्त्री वृषाकपायी हरविष्णू वृषाकपीत्यमरः वृषाकपायी श्रीगौर्योरि
तिच अग्नायी कुसितायी कुसिदायी कुसिदशब्दोह्रस्वमध्योनतुदीर्घमध्यः मनोरौवा मनुशब्दस्यौकारादेशः
स्यादुदात्तैकारश्चवा ताभ्यांसंनियोगशिष्टोङीप्च मनोःस्त्री मनायी मनावी मनुः वर्णादनुदात्तात्तोपधात्तोनः ॥
वर्णवाचीयोऽनुदात्तान्तस्तोपधस्तदन्तादनुपसर्जनात् प्रातिपदिकाद्वाङीप्स्यात् तकारस्यनकारादेशश्च एता एनी
रोहिता रोहिणी वर्णानांतणतिनितांतानामितिफिट्सूत्रेणाद्युदात्तः त्र्येण्यौशबलत्वेतिगृह्यं त्र्येण्येतान्यस्याः इ २४
तिबहुव्रीहिः अनुदात्तात्किम् श्वेता घृतादीनांचेत्यन्तोदात्तोऽयम् अतइत्येव शितिःस्त्री पिशंगादुपसंख्यानम् ॥
पिशंगी पिशंगा असितपलितयोर्न असिता पलिता छंदसिक्नमेके असिक्नी पलिक्नी अवदातशब्दस्तुनवर्णवा
ची किंतुविशुद्धवाची तेनावदातेत्येव अन्यतोङीष् तोपधभिन्नाद्वर्णवाचिनोऽनुदात्तान्तात्प्रातिपदिकात्स्त्रियांङी राम ३०
ता

ता

ङीष्स्यात् कल्माषी सारंगी लघावंते द्वयोश्च बह्वषो गुरुरिति मध्योदात्तावेतौ अनुदात्तांत्किम् कृष्णा कपिला षि
द्गौरादिभ्यश्च षिद्भ्यो गौरादिभ्यश्च ङीष्स्यात् नर्तकी गौरी अनडुही अनड्वाही पिप्पल्यादयश्च आकृतिगणो
यम् सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः अंगस्योपधाया यस्य लोपः स्यात्सचेदीः सूर्याद्यवयवः मत्स्यस्य
ङ्याम् सूर्यागस्त्ययोश्छे च ङ्यां च तिष्यपुष्ययोर्नक्षत्राणि यलोपः इति वाच्यम् मत्सी मातरिषिच्चेति षित्वादेव
सिद्धे गौरादिषु मातामही शब्दपाठसामर्थ्यादनित्यः षितांङीष् दंष्ट्रा जानपदकुंडगोणस्थलभाजनागकालनील
कुशकामुककबरात् वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु ॥ ॥
एकादशभ्यः प्रातिपदिकेभ्यः क्रमाद्वृत्त्यादिविषयेषु ङीष्स्यात् जानपदी वृत्तिश्चेत् अन्यात्तु जानपदी उत्सादि
त्वादञंतत्वेन टिड्ढेति ङीप्याद्युदात्तः कुंडी अमत्रं चेत् कुंडान्या कुंडिदाहे गुरोश्च हलः इत्यप्रत्ययः यत्तु अमृते
जारजः कुंड इति मनुष्यजातिवाचिनस्ततो जातिलक्षणो ङीष्भवत्येव अमत्रे दिव्यस्त्रीविषयत्वाट्टाप् सोऽङीष्विधीय
ते न च नियम्यते गोणी आवपनं चेत् गोणान्या स्थली अकृत्रिमा चेत् स्थलान्या भाजी श्राणा चेत् भाजान्या
नागी स्थूला चेत् नागान्या गजवाचीनागशब्दः स्थौल्यगुणयोगादन्यत्र प्रयुक्त उदाहरणं ॥ सर्पवाची तु दैर्घ्यगु
णादन्यत्र प्रयुक्तः प्रत्युदाहरणं काली वर्णश्चेत् कालान्या नीली अनाच्छादनं चेत् नीलान्या नील्या रक्ता शा
टीत्यर्थः नील्या अन्वक्तव्य इत्यत्र अनाच्छादनेपि न सर्वत्र किंतु नीलादोषधौ नीली प्राणिनि च नीली गौः ॥
संज्ञायां वा नीली नीला कुशी अयोविकारश्चेत् कुशान्या कामुकी मैथुनेच्छा चेत् कामुकान्या कबरी केशानां स
न्निवेशविशेषः कबरान्या चित्रेत्यर्थः शोणात्प्राचां शोणी शो' वोतो गुणवचनात् उदंताद्गुणवाचिनो वा ङीष्स्या

णा तू

त्मन्हीम्दुः उतः किम् श्रुचिः गुणेतिकिम् आखुः खरुसंयोगोपधात्न खरुः। पतिंवरा कन्या पांडुः बह्वादिभ्य
सि॰कौ॰३१ श्च राम्पोवाङीष् वह्वी वहुः कृदिकारादक्तिनः रात्रिः रात्री सर्वतोऽक्तिन्नर्थादित्येके शकटिः शाकटी अक्ति
न्नर्थात्किम् अजननिः क्तिन्नंतत्वादप्राप्तेविधप्रपद्धतिशब्दोगणेपठ्यते पद्धतिः पद्धती हिमकाषिह
तिषुचेतिपङ्गावः पुंयोगादाख्यायाम् याथुमाख्यापुंयोगात्स्त्रियांवर्त्ततेततोङीष्स्यात् गोपस्यस्त्री गोपी पालकां
तान्न गोपालिका अश्वपालिका सूर्य्याद्देवतायांचाबाच्यः सूर्यस्यस्त्रीदेवतासूर्य्या देवतांकिम् सूरी कुंती मानु यां॰५
षीयं इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् एषामानुगागमः स्यात् ङीषच इ
न्द्रादीनां पुंसां मातुलाचार्ययोस्त्वपुंयोगएवेष्यते तत्रङीषिसिद्धे आनुगागममात्रंविधीयते इतरेषांचतुर्णांउभ
यं इन्द्राणी हिमारण्ययोर्महत्वे महद्धिमं हिमानी अरण्यानी यवाद्दोषे दुष्टोयवो यवानी यवनाल्लिप्यां यव
नानी लिपिर्यवनानी मातुलोपाध्याययोरानुग्वा मातुलानी मातुली उपाध्यायानी उपाध्यायी यातुस्वयमे
वाध्यापिका तत्रवाङीप्वाच्यः उपाध्यायी उपाध्याया आचार्यादणत्वंच आचार्यस्यस्त्री आचार्यानी पुंयोगइत्येव
आचार्यास्वयंव्याख्यात्री अर्यक्षत्रियाभ्यांवास्वार्थे अर्याणी अर्यास्वामिनीवैश्यावेत्यर्थः क्षत्रियाणी क्षत्रिया।।
पुंयोगेतु अर्यी क्षत्रियी कथंब्रह्माणीति ब्रह्माणमानयतिजीवयतिकर्मण्यण क्रीतात्करणपूर्वात् क्रीतान्ता
दकंतात्करणादेस्त्रियांङीष्स्यात् वस्त्रक्रीती क्वचिन्न धनक्रीता क्तादल्पाख्यायाम् करणादेः क्तांतादकंतान्ङीष्
स्यादल्पत्वेद्योत्ये अभ्रलिप्तीद्यौः अल्पाख्यायांकिम् चंदनलिप्ता युवती बहुव्रीहेश्चान्तोदात्तात् बहुव्रीहेःक्तांताद
न्तोदात्तादकंतात्स्त्रियांङीष्स्यात् जातिपूर्वादितिवक्तव्यं तेनबहुनस्नु कालसुखादिपूर्वान्न ऊरुभिन्नी नेह बहुकृता रा॰म॰३१

जातांतान्न दंतजाता पाणिगृहीती भार्या यां पाणिगृहीतान्या अस्वांगपूर्वपदाद्वा पूर्वेणनित्ये प्राप्ते विकल्पोयं सुरापीती सुरा
पीता अंतोदात्तात्किम् वस्त्रछन्ना अनाच्छादनादित्युक्तेर्न निषेधः अत एव पूर्वेणापि न ङीष् स्वांगाच्चोपसर्जनादसंयोगो
पधात् असंयोगोपधमुपसर्जनं यत्स्वांगं तदंतादकारांतात् प्रातिपदिकाद्वा ङीष् स्यात् केशानतिक्रांता अतिकेशी अतिकेशा
चंद्रमुखी चंद्रमुखा संयोगोपधात्तु सुगुल्फा उपसर्जनात्किम् सुशिखा स्वांगंत्रिधा अद्रवं मूर्तिमत्स्वांगं प्राणिस्थमवि
कारजम् सुस्वेदा द्रवत्वात् सुज्ञाना अमूर्तत्वात् सुमुखाशाला अप्राणिस्थत्वात् सुशोफा विकारजत्वात् अतत्स्थं त
त्र दृष्टं चेत् सुकेशी सुकेशा वा रथ्या अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात् तेन चेत्तत्तथायुतं सुस्तनी सुस्तना वा प्रतिमा
प्राणिवत् प्रणिधाहश्मूस्थितत्वात् नासिकोदरौष्ठजंघादंतकर्णशृंगाच्च एभ्यो वा ङीष् आद्ययोर्बह्वच्लक्षणो निषेधं वाध्य ६८
ते पुरस्तादपवादन्यायात् ओष्ठादीनां पंचानां तु असंयोगोपधादिति वाध्यते मध्येपवादन्यायात् सहनञ्सूत्रेण तु प्रतिषेधः
दस्य परत्वाद्बाधकः तुंगनासिकी तुंगनासिका इत्यादि नेह सहनासिका अनासिका अत्र वृत्तिः अंगगात्रकंठेभ्यो वक्त
व्यं स्वंगी स्वंगेत्यादि एतच्चात्रकृतसमुच्चयार्थेन चकारेण संग्राह्यमिति केचित् भाष्यादेरनुक्तत्वादप्रमाणमिति प्रामाणि प्र
काः अत्र वार्तिकानि पुच्छाच्च सुपुच्छी सुपुच्छा कवरमणिविषशरेभ्यो नित्यं कवरं चित्रं पुच्छं यस्याः सा कवरपुच्छी ॥ ॥
स्त्री उपमानात्पक्षाच्च पुच्छाच्च नित्यमित्येव उलूकपक्षीशाला उलूकपुच्छीसेना नक्रोडादिबह्वचः क्रोडादेर्बह्वचश्च स्वां
गान्न ङीष् कल्याणक्रोडा अश्वानामुरः क्रोडा आकृतिगणोयं सुजघना सहनञ्विद्यमानपूर्वाच्च सहेत्यादित्रि
कपूर्वान्न ङीष् सकेशा अकेशा विद्यमाननासिका नखमुखात्संज्ञायां न ङीष् स्यात् शूर्पणखा गौरमुखा संज्ञायां
किम् ताम्रमुखी कन्या दिक्पूर्वपदान्ङीप् दिक्पूर्वपदात्स्वांगांतात् प्रातिपदिकात्परस्य ङीपो ङीषादेशः स्यात् ॥ ॥

83/9

सि॰कौ॰३२ शङ्खमुखी आद्युदात्तंपदं वाहः वाहंतात्प्रातिपदिकान्ङीष् ङीषेवानुवर्ततेनेतेनङीप् दित्यवाट्चमे दित्यौहीचमे सख्यशि
श्वीतिभाषायाम् इतिशब्दःप्रकारेभाषायामित्यस्यानंतरंद्रष्टव्यः तेनछंदस्यपिक्वचित् सखी अशिश्वी आधेनवो
धुनयतामशिश्वी· जातेरस्त्रीविषयादयोपधात् जातिवाचियन्नचस्त्रियांनियतमयोपधंततःस्त्रियांङीष्स्यात् ॥ यां
आकृतिग्रहणाजातिः अनुगतसंस्थानव्यंग्येत्यर्थः तटी लिंगानांचनसर्वभाक् सकृदाख्यातनिर्ग्राह्या असर्वलिं
गत्वेसत्येकस्यांव्यक्तौकथनात् व्यक्त्यंतरेकथनंविनापिसुग्रहाजातिरितिलक्षणांतरं वृषली सत्यंतंकिम् शुक्ला ए
कृदित्यादिकिम् देवदत्ता गोत्रंचचरणैःसह अपत्यप्रत्ययान्तःशाखाध्येतृवाचीचशब्दोजातिकार्यंलभतइत्यर्थः
तु औपगवी कठी बह्वृची ब्राह्मणीत्यत्रशार्ङ्गरवादिपाठान्ङीनाङीषाध्यते जातेः किम् मुण्डा अस्त्रीविषयात्किम् बला
का अयोपधात्किम् क्षत्रिया योपधप्रतिषेधेगवयहयमुकयमनुष्यमत्स्यानामप्रतिषेधः गवयी हयी मुकयी हलस्त
द्धितस्येतियलोपः मानुषी मत्स्यस्यङ्यां मत्सी पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च पाकाद्युत्तरपदाज्जाति र
शालपण २ वाचिनःस्त्रीविषयादपिङीष्स्यात् ओदनपाकी शंकुकर्णी शंखपुष्पी दासीफली दर्भमूली गोवाली औषधिविशे
षरूढा एते इतोमनुष्यजातेःङीष्स्यात् दाक्षी योपधादपि उदमेयस्यापत्यं औदमेयी मनुष्येतिकिम् तित्तिरिः ॥
ऊङुतः उकारांतादयोपधान्मनुष्यजातिवाचिनःस्त्रियामूङ्स्यात् कुरूः कुरुनादिभ्योण्यः तस्यस्त्रियामवंतीत्यादिना
लुक् अयोपधात्किम् अध्वर्युर्ब्राह्मणी अप्राणिजातेश्चारज्ज्वादीनामुपसंख्यानं रज्ज्वादिपर्युदासादुवर्णांतेभ्यःएव
अलाबूः कर्कंधूः अनयोर्दीर्घांतत्वेपि नोङ्धात्वोरितिविभक्त्युदात्तत्वप्रतिषेधःऊङः फलं प्राणिजातेस्तु कृक
वाकुः रज्ज्वादेस्तु रज्जुः हनुः बाह्वंतात्संज्ञायां स्त्रियामूङ् भद्रबाहूः पंगोश्च पंगूः श्वशुरस्योकाराकारलो राम ३२

संज्ञायांकिं वृत्तबाहुः।